जैसे श्रीविष्णुनें पूंछरहे विनताके पुत्र, गरुड़को कहा तैसे तुम्हारेको संदे[illegible]

विराजरहे श्रीहरिको नम्र होय, गरुड़जी [illegible] नरोत्तम । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ सीतारामस्य पौत्रेण शिवदासात्मजेन च । सेही [illegible] ज्ञानबोधिका ॥ अथ गरुडपुराणस्य ज्ञानबोधिकाभाषाटीकाप्रारंभः ॥ ग्रंथके आदिमें मंगलाचरण करना उत्तम है, कारण मंगलाचरणसे ग्रंथ निर्विघ्न समाप्त होता है, इसीसे भगवानका वृक्षरूप बर्णन करते हैं— मधुनामा दैत्यके सूदन नाश करनेवाले भगवान् पादपस्वरूप अर्थात् वृक्ष सो सबसेभी अधिक वर्त्तते हैं; जैसे वृक्ष पावोंसे जलको पान करते हैं, तैसे मधुसूदन भगवान्भी चरणोंसे सब जग[illegible]की पालना करते हैं; इसवास्ते भगवानको पादप ये नाम कहा है. कैसा वो भगवान्रूपी वृक्ष है ? जीवमात्रको द्वेषरहित जो धर्म नाम अमृतरूप जो भगवद्धर्म वोही दृढ़ बँधा हुवा है मूल जिसका, जैसा दृढ़मूलवृक्ष अपने स्थानमें निश्चल स्थिर रहता है, तैसे भगवान्भी भगवद्धर्मीके हृदयमें

॥ श्रीर्जयति ॥ ॥ धर्मदृढबद्धमूलोवेदस्कंधःपुराणशाखाढ्यः ॥ क्रतुकुसुमोमोक्षफलोमधुसूदनपादपोजयति ॥ १ ॥

निश्चल स्थिर रहते हैं. फेर कैसा मधुसूदनरूप वृक्ष है ? वेदही हैं स्कंध अर्थात् डालें जिसके, अष्टादश पुराण हैं शाखा जिसके, जैसे वृक्ष विस्तारवान् स्कंध और शाखाकरके दूर हो तौभी समीपजैसा दीखे है, तैसे यह भगवान्भी वेदपुराणोंसे प्रकृतिपुरुषसे परे हैं, तथापि समीप प्राप्त होते हैं. जैसे वृक्ष डाला और शाखावोंकरके समीप प्राप्त हुयेको बहुत फल देते हैं, तैसे भगवान्रूप वृक्षभी वेदपुराणोंकरके श्रोतावक्तावोंको धर्म, अर्थ, काम, मोक्ष, फल देते हैं. जैसे वृक्षकी शाखा स्कंधसे निकल उनमें लगी हुई हैं तैसे पुराणभी वेदसे प्रगट हो, वेदमें मिले हुये हैं. सो इतिहासपुराणभी पांचवां वेद कहा है. फेर कैसा भगवान्रूप वृक्ष है ? यज्ञही हैं पुष्प जिसके और मोक्षही है फल जिसके, जैसे वृक्षके पुष्प प्रगट होनेके सा-

थही फलप्राप्ति होती है, तैसे यज्ञादिक अनुष्ठानोंसे शुद्ध अंतःकरणके बाद मोक्षफलका लाभ होता है. यहां यह अभिप्राय है कि–मोक्षदाता भगवान-से दूसरा नहीं है ॥ १ ॥ नैमिषारण्य देवतोंके क्षेत्रमें एकसमयमें (८८०००) अट्ठासी हजार शौनकादिक ऋषि स्वर्गप्राप्तिके अर्थ हजार वर्षका नेम कर, यज्ञप्रारंभ करते भये ॥ २ ॥ वोह शौनकादिक मुनि एकसमयमें प्रातःकाल अग्निहोत्र करके, विराजमान होरहे सूतजीको सत्कारकर, आदरसे

नैमिषेऽनिमिषक्षेत्रेऋषयःशौनकादयः ॥ सत्रंस्वर्गायलोकायसहस्रसममासत ॥ २ ॥ तएकदातुमुनयःप्रातर्हुतहुताग्नयः ॥
सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ॥ ३ ॥ ॥ ऋषयऊचुः ॥ ॥ कथितोभवतासम्यग्देवमार्गःसुखप्रदः ॥ इदानीं
श्रोतुमिच्छामोयममार्गंभयप्रदम् ॥ ४ ॥ तथासंसारदुःखानितत्क्लेशक्षयसाधनम् ॥ ऐहिकामुष्मिकान्क्लेशान्यथावद्वक्तुमर्हसि
॥ ५ ॥ ॥ सूतउवाच ॥ ॥ शृणुध्वंभोविवक्ष्यामियममार्गंसुदुर्गमम् ॥ सुखदंपुण्यशीलानांपापिनांदुःखदायकम् ॥ ६ ॥

यह प्रश्न पूंछते भये ॥ ३ ॥ ऋषि बोलेकि–हे सूत ! तुमने भलेप्रकार सुखदेनेवाला देवमार्ग कहा. अब भयदेनेवाला यममार्गश्रवण करनेकी इच्छा करते हैं ॥४॥ तैसे संसारका दुःख और उन दुःखोंके क्षयका साधन तथा इस लोक और परलोकका दुःख इन्होंको यथार्थ कहो ॥५॥ अब सूतजी कहते हैं हे मुनियो ! श्रवण करो. अतिदुर्गम यममार्ग कहताहूँ. कैसा यममार्ग है ? कि–पुण्यशील पुरुषोंको सुखदेनेवाला पापियोंको दुःखदायक ॥६॥

... सो कहावै (स्वर्गाय) अर्थात् नारायण सोई जो स्वभक्तोंको निवासस्थान, लोक तिसकी प्राप्तिके लिये; क्योंकि

जैसे श्रीविष्णुनें पूंछरहे विनताके पुत्र, गरुड़को कहा तैसे तुम्हारेको संदेह दूरहोनेको कहता हूं ॥ ७ ॥ कोई समयमें वैकुंठमें आनंदसे विराजरहे श्रीहरिको नम्र होय, गरुड़जी पूंछते भये ॥८॥ गरुड़जी बोले कि– हे देव! आपने मेरेको बहुतप्रकारका भक्तिमार्ग कहा है. तैसेही भक्तोंकी उत्तम गतिभी कही है ॥९॥ अब भयकारी यममार्गश्रवणकी इच्छा करता हूं. आपकी भक्तिबिमुखनको तहां गमन सुना है ॥१०॥

यथाश्रीविष्णुनाप्रोक्तंवैनतेयायपृच्छते ॥ तथैवकथयिष्यामिसंदेहच्छेदनायवः ॥ ७ ॥ कदाचित्सुखमासीनंवैकुंठेश्रीहरिंगुरुं ॥ विनयावनतोभूत्वापप्रच्छविनतासुतः ॥ ८ ॥ ॥ गरुडउवाच ॥ ॥ भक्तिमार्गोबहुविधःकथितोभवतामम ॥ तथाचकथितादेवभक्तानांगतिरुत्तमा ॥ ९ ॥ अधुनाश्रोतुमिच्छामियममार्गंभयंकरम् ॥ त्वद्भक्तिविमुखानांचतत्रैवगमनंश्रुतम् ॥ १० ॥ सुगमंभगवन्नामजिह्वाचवशवर्तिनी ॥ तथापिनरकंयांतिधिग्धिगस्तुनराधमान् ॥ ११ ॥ अतोमेभगवन्ब्रूहिपापिनांयागतिर्भवेत् ॥ यममार्गस्यदुःखानियथातेप्राप्नुवंतिवै ॥ १२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ वक्ष्येऽहंशृणुपक्षींद्रयममार्गंचयेनये ॥ नरकेपापिनोयांतिशृण्वतामपिभीतिदम् ॥ १३ ॥ ॥ ॥

देखो! कि– भगवन्नामभी सुगम है. जिव्हाभी अपने बस है तथापि जो नरकोंमें जाते हैं उन नीच मनुष्योंको धिक्कार है ॥ ११ ॥ हे भगवन्! इसीसे मेरेको जो पापियोंकी गति है सो कहो. जैसे वह पापी यममार्गके दुःखोंको भोगते हैं, सो कहो ॥ १२ ॥ श्रीभगवान् कहते हैं–हे गरुड़! मैं यममार्ग कहता हूं सो सुनों. जिस मार्गसे नरकमें पापी जाते हैं. कैसा यममार्ग है? कि– सुननेवालोंकोभी भय देता है ॥ १३ ॥

हे गरुड़! जो पापी, मूर्ख, दयाधर्मसे रहित और दुष्टोंकी संगति करते हैं. तथा सत्शास्त्र और सत्संगतिसे बिमुख हैं ॥ १४ ॥ और हम बड़े हैं ऐसे मानेहैं, हम बड़े धनी हैं, मानी हैं, इस प्रकारके मदसे संयुक्त हैं, आसुरभावमें प्राप्त हैं और दैवी संपदासे रहित हैं ॥ १५ ॥ अनेक कामोंमें चित्तको भ्रमा रहे हैं, मोहजालमें आच्छादित हैं और कामभोगोंमे आसक्त हैं. तिह्नोंका अपवित्र नरकमें पतन होताहै ॥ १६ ॥

येहिपापरतास्तार्क्ष्यदयाधर्मविवर्जिताः ॥ दुष्टसंगाश्चसच्छास्त्रसत्संगतिपराङ्मुखाः ॥ १४ ॥ आत्मसंभाविताःस्तब्धाधन
मानमदान्विताः ॥ आसुरंभावमापन्नादैवीसंपद्विवर्जिताः ॥ १५ ॥ अनेकचित्तविभ्रांतामोहजालसमावृताः ॥ प्रसक्ताः
कामभोगेषुपतंतिनरकेऽशुचौ ॥ १६ ॥ येनराज्ञानशीलाश्चतेयांतिपरमांगतिं ॥ पापशीलानरायांतिदुःखेनयमयातनां
॥ १७ ॥ पापिनामैहिकंदुःखंयथाभवतितच्छृणु ॥ ततस्तेमरणंप्राप्ययथागच्छंतियातनाः ॥ १८ ॥ सुकृतंदुष्कृतंवापिभु
क्त्वापूर्वंयथार्जितं ॥ कर्मयोगात्तदातस्यकश्चिद्व्याधिःप्रजायते ॥ १९ ॥ ॥ ॥

जो ज्ञानशील पुरुष हैं वै परमगतिको प्राप्त होते हैं. जो पापशील मनुष्य हैं वे दुःखसे यमयातनामें जाते हैं ॥ १७ ॥ अब पापियोंको इस लोकमें जो दुःख होता है सो सुनो. इस लोकको दुःख भोग, मरकर, जैसे नरकोंमें जातेहैं सो सुनो ॥ १८ ॥ पुण्य वा पाप जैसा पूर्व करा हो तैसा भोगनेके बाद कर्मयोगसे उनके अंतमें कोई व्याधि होती है ॥ १९ ॥ ॥ ॥ ॥

तहां अनुक्रमसे पातकी इन सोलह पुरोंको उल्लंघन करके, धर्मराजके पुरमें जाता है ॥ ५८ ॥ पुरोंके नाम-सौम्यपुर १, सौरिपुर २, नगेंद्रभवन ३, गंधर्वपुर ४, शैलागम ५, क्रौंचपुर ६, क्रूरपुर ७, विचित्रभवन ८, बह्वापद ९, दुःखद १०, नानाक्रंदपुर ११, सुतप्तभवन १२, रौद्रपुर १३, पयोवर्षण १४, शीताढ्य १५, बहुभीति १६ इन सोलह पुरोंके अगाड़ी धार्मिकलोगोंको लभ्य धर्मराजका भवन और पापीलोगोंको लभ्य यमयातनारूप यमपुर है ॥ ५९ ॥ यमदूतोंकी पाशोंसें बँधाहुवा पापी हाहा !! ऐसा रुदन करता अपना घर त्यागकर, यमपुरमें

अतीत्यक्रमशोमार्गेपुराणीमानिषोडश ॥ प्रयातिधर्मराजस्यभवनंपातकीजनः ॥ ५८ ॥ सौम्यंसौरिपुरंनगेंद्रभवनंगंधर्वं शैलागमौक्रौंचंक्रूरपुरंविचित्रभवनंबह्वापदंदुःखदं ॥ नानाक्रंदपुरंसुतप्तभवनंरौद्रंपयोवर्षणंशीताढ्यंबहुभीतिधर्मभवनंयाम्यं पुरंचाग्रतः ॥ ५९ ॥ याम्यपाशैर्धृतःपापीहाहेतिप्ररुदन्पथि ॥ स्वगृहंतुपरित्यज्यपुरंयाम्यमनुव्रजेत् ॥ ६० ॥ इतिश्रीसारोद्धारेगरुडपुराणेपापिनामैहिकामुष्मिकदुःखनिरूपणंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ गरुडउवाच ॥ कीदृशोयमलोकस्य पंथाभवतिदुःखदः ॥ यत्रयांतियथापापास्तन्मेकथयकेशव ॥ १ ॥ ॥ ॥ ॥

जाता है ॥ ६० ॥ इति श्रीसारोद्धारगरुडपुराणस्य ज्ञानबोधिनीभाषाटीकायां पापिनां ऐहिकामुष्मिकदोषनिरूपणं नाम प्रथमोऽध्यायः ॥ १ ॥ इस लोक और परलोकके दुःख संक्षेपसे सुनकर, गरुड़जी अब विस्तारसे सुननेको फेर पूछते हैं. गरुड़जी बोले कि– हे केशव! यमलोकको मार्ग कैसा है? क्या दुःख देता है? और उस मार्गमें पापी कैसे जाते हैं? सो कहो ॥ १ ॥ ॥ ॥

अब भगवान् कहते हैं कि– हे गरुड़! महान् दुःख देनेवाला यममार्ग मैं तुम्हारेको क॰..। हूं. तुम मेरे भक्त हो तोभी सुनकर, कंपायमान
होवोगे ॥ २ ॥ तिसमार्गमें कहीं वृक्षोंकी छाया नहीं है जिसमें मनुष्य विश्राम लेवै तथा अन्नादिक नहीं हैं जिस्से भूखेका प्राण बचै ॥३॥
कहीं जलभी नहीं दीखता कि– अत्यंत प्यासा प्राणी जिसको पीवै. हे गरुड़! उस मार्गमें बारह १२ सूर्य तपते हैं, जैसै महाप्रलयमें तपैं ॥४॥

॥ ॥ श्रीभगवानुवाच ॥ ॥ यममार्गंमहद्दुःखप्रदंतेकथयाम्यहम् ॥ ममभक्तोऽपितच्छ्रुत्वात्वंभविष्यसिकंपितः ॥ २ ॥ वृक्ष
च्छायानतत्रास्तियत्रविश्रमतेनरः ॥ यस्मिन्मार्गेनचान्नाद्यंयेनप्राणान्समुद्धरेत् ॥ ३ ॥ नजलंदृश्यतेक्कापितृषितोऽतीवयःपिबेत् ॥
तपंतेद्वादशादित्याःप्रलयांतेयथाखग ॥ ४ ॥ तस्मिन्गच्छतिपापात्माशीतवातेनपीडितः ॥ कंटकैर्विध्यतेक्कापिक्कचित्सर्पैर्महावि
षैः ॥ ५ ॥ सिंहैर्व्याघ्रैःश्वभिर्घोरैर्भक्ष्यतेक्कापिपापकृत् ॥ वृश्चिकैर्दंशतेक्कापिक्कचिद्दह्यतिवह्निना ॥ ६ ॥ ततःक्कचिन्महाघोरमसिप
त्रवनंमहत् ॥ योजनानांसहस्रेद्वेविस्तारायामतः स्मृतम् ॥ ७ ॥ ॥ ॥ ॥

ऐसे मार्गमें पापी जाता है. शीतसे तथा वायुसे दुःखित हुवा कहीं कांटोंसे बिंध जाता है, कहीं महाजहरी सर्पोंसे खाया जाता है, ॥ ५ ॥
कहीं पापी सिंह, व्याघ्र और घोर कुत्तोंसे खाया जाता है, कहीं बिच्छू खाते हैं, कहीं अग्निसे दग्ध होता है ॥ ६ ॥ तहां कोई ठिकाने म-
हाघोर तलवारजैसे पत्तोंवाला महान् दो हजारयोजन चौड़ा और लंबा वन आता है ॥ ७ ॥ ॥ ॥

तब अंगुष्ठप्रमाण जीव हा! हा!! शब्द करते, शरीरसे निकल, उसीदम अपने शरीरको देखरहे जीवको यमदूत पकड़ते हैं ॥३२॥ उस जीवको नरक भोगनेवाले देहको प्राप्त करा, पाशसे गलेमें बांधकर, बलसे बड़े लंबे मार्गके प्रति यमदूत लेजाते हैं. जैसे चोरको राजदूत लेजाय ॥ ३३ ॥ रस्तेमें चलतेहुवेको दूत डराते हैं तथा नरकोंको तीव्र भय वारंवार कहते हैं ॥३४॥ हे दुष्ट जीव! शीघ्र चल. उभी तुझको यमराजके स्थानमें

अंगुष्ठमात्रःपुरुषोहाहाकुर्वन्कलेवरात् ॥ तदैवगृह्यतेदूतैर्याम्यैःपश्यन्स्वकंगृहम् ॥ ३२ ॥ यातनादेहआवृत्यपाशैर्बद्ध्वागलेब
लात् ॥ नयतोदीर्घमध्वानंदंड्यंराजभटायथा ॥ ३३ ॥ तस्यैवंनीयमानस्यदूताःसंतर्जयंतिच ॥ प्रवदंतिभयंतीव्रंनरका
णांपुनःपुनः ॥ ३४ ॥ शीघ्रंप्रचलदुष्टात्मन्यास्यसित्वंयमालयं ॥ कुंभीपाकादिनरकांस्त्वांनयावोऽद्यमाचिरम् ॥ ३५ ॥
एवंवाचस्तदाशृण्वन्बंधूनांरुदितंतथा ॥ उच्चैर्हाहेतिविलपंस्ताड्यतेयमकिंकरैः ॥ ३६ ॥ तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवे
पथुः ॥ पथिश्वभिर्भक्ष्यमाणआर्तोऽघंस्वमनुस्मरन् ॥ ३७ ॥ ॥ ॥ ॥

लेजाते हैं तहां कुंभीपाकआदि नरकोंमें अभी डालेंगे. देर मत जान ॥ ३५ ॥ ऐसे भयंकर यमदूतोंकी वाणी सुनकर, पीछेसे बंधुवोंको रोदन सुनके, उच्चस्वरसे हा! हा!! ऐसे विलाप करताहुवा यमदूतोंसे ताड़नाको प्राप्त होताहै ॥३६॥ यमदूतोंकी तर्जनासे फूटा है हृदय तथा प्रगट भया है कंप जिसके और मार्गमें कुत्ते खाय रहे हैं ऐसा प्राणी दुःखीहुवा अपने पापको स्मरण करता हैं ॥ ३७ ॥

फेर क्षुधातृषासे संयुक्तहुवा, मार्गमें सूर्यके घामके दावानलजैसे गरमपवनसे तपी भई बालूमें अतितपायमानहुवा, पीठपरसे चाबुकसे ताड़नाको प्राप्त हुवा, शक्ति नहीं है तोभी नहीं कहीं आश्रम और जल ऐसे मार्गमें चलता है ॥ ३८ ॥ तहां तहां पड़ता हुवा मूर्छामें प्राप्त हुवा फेर उठकर, अंधकारमार्गसे यमराजके स्थानको जाता है ॥ ३९ ॥ तहां ९९००० हजार योजन यमके मार्गमें अधिक पापीको दो मुहूर्तसे सामान्य पापीको तीन मुहूर्तसे ले जाते हैं. फेर वहाँ वहाँ घोर नरकयातना उसको दूत दिखाते हैं ॥ ४० ॥ एक मुहूर्तमें वेगसे भयंकर य-

क्षुत्तृट्परीतोऽर्कदवानलानिलैःसंतप्यमानःपथितप्तवालुके ॥ कृच्छ्रेणपृष्ठेकशयाचताडितश्चलत्यशक्तोऽपिनिराश्रमोदके
॥ ३८ ॥ तत्रतत्रपतञ्छ्रांतोमूर्च्छितःपुनरुत्थितः ॥ यथापापीयसानीतस्तमसायमसादनम् ॥ ३९ ॥ त्रिभिर्मुहूर्तैर्द्वा
भ्यांवानीयतेतत्रमानवः ॥ प्रदर्शयंतिदूतास्ताघोरानरकयातनाः ॥ ४० ॥ मुहूर्तमात्रात्त्वरितंयमंवीक्ष्यभयंपुमान् ॥
यमाज्ञयासमंदूतैःपुनरायातिखेचरः ॥ ४१ ॥ आगम्यवासनाबद्धोदेहमिच्छन्यमानुगैः ॥ धृतःपाशेनरुदतिक्षुत्तृड्भ्यां
परिपीडितः ॥ ४२ ॥ भुंक्तेपिंडंसुतैर्दत्तंदानंचातुरकालिकं ॥ तथापिनास्तिकस्तार्क्ष्यतृप्तिंयातिनपातकी ॥ ४३ ॥

मको देख, पुरुष यमकी आज्ञासे फेर दूतोंसहित आकाशमार्गसे पीछा आता है ॥ ४१ ॥ पीछा आकर, अपने घरकी वासनासे बँधा यमदूतोंसे पाशकरके बँधा मुख, तृषासे पीड़ित हुवा रोता है ॥ ४२ ॥ तहां अंतमें पुत्रोंसे दिये पिंडोंको खाता है और अंतसमयमें मृत्युस्थान-आदि चार स्थानोंमें किया दान मिलता है. तोभी हे गरुड़! नास्तिकवादी पापी पुरुष तृप्त नहीं होता है ॥ ४३ ॥

पापी पुरुषोंको दान, श्राद्ध जलांजलि नहीं प्राप्त होताहै इसके लिये पिंडदान खानेवालेभी क्षुधासे व्याकुल हुवे जाते हैं ॥ ४४ ॥ वह पिंडदानोंसे रहित प्रेतरूप होते हैं, पीछे कल्पपर्यंत निर्जनबनमें बहुत दुःखितहुवे भ्रमते हैं ॥ ४५ ॥ कर्म बिगर भोगे कोटिशतवर्षोंसेंभी क्षीण नहीं होता. कर्मोंसे प्राप्तहुई यमयातना भोगेविना मनुष्यजन्म नहीं मिलता ॥ ४६ ॥ हे गरुड़! इसीसे पुत्र दशोंदिनोंमें पिंडदान देतारहे.

पापिनांनोपतिष्ठंतिदानंश्राद्धंजलांजलिः ॥ अतःक्षुद्व्याकुलायांतिपिंडदानभुजोऽपिते ॥ ४४ ॥ भवंतिप्रेतरूपास्तेपिंडदानविवर्जिताः ॥ आकल्पंनिर्जनारण्येभ्रमंतिबहुदुःखिताः ॥ ४५ ॥ नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपि ॥ अभुक्त्वायातनांजंतुर्मानुष्यंलभतेनहि ॥ ४६ ॥ अतोदद्यात्सुतःपिंडान्दिनेषुदशसुद्विज ॥ प्रत्यहंतेविभज्यंतेचतुर्भागैःखगोत्तम ॥ ४७ ॥ भागद्वयंतुदेहस्यपुष्टिदंभूतपंचके ॥ तृतीयंयमदूतानांचतुर्थंसोपजीवति ॥ ४८ ॥ अहोरात्रैश्चनवभिःप्रेतःपिंडमवाप्नुयात् ॥ जंतुर्निष्पन्नदेहश्चदशमेबलमाप्नुयात् ॥ ४९ ॥ ॥ ॥

उन पिंडोंके नित्यप्रति चारभाग होते हैं ॥ ४७ ॥ उनमेंसे दो भाग तो पंचभूतोंसे हुए शरीरको पुष्टि देते हैं. तीसरा यमदूतोंको प्राप्त होता है. और चौथा भाग वोह प्राणी खाता है ॥ ४८ ॥ नव दिनोंके पिंडोंसे प्रेत पिंडज शरीरको प्राप्त होता है. प्राप्तहुवा है देह ऐसा जो जीव सो दशवें दिन बलको प्राप्त होता है ॥ ४९ ॥ ॥ ॥ ॥ ॥

हे गरुड़! पूर्वदेहदग्धहुवा तोभी फेर पिंडसे एकहाथप्रमाण देह उत्पन्न होता है जिससे पुरुष यममार्गमें पुण्य, पाप भोगता है ॥ ५० ॥ प्रथमदिनके पिंडसे मस्तक होता है, दूसरे दिनके पिंडसे ग्रीवा और स्कंध होते हैं, तीसरेसे हृदय होता है, ॥ ५१ ॥ चौथेसे पीठ होती है, पंचमसे नाभि होती है, षष्ठमसे कटि और गुदा होती है, सप्तमदिनके पिंडसे जंघा होती हैं, ॥ ५२ ॥ अष्टम और नवमसे जानु और पग होते हैं, दशमदिनमें क्षुधा तृषा होती है ॥ ५३ ॥ पिंडोंसे हुवे देहको प्राप्त हो, क्षुधातृषासे पीड़ित हुवा प्रेत एकादशाह और द्वादशाह

दग्धेदेहेपुनर्देहःपिंडैरुत्पद्यतेखग ॥ हस्तमात्रःपुमान्येनपथिभुंक्तेशुभाशुभम् ॥ ५० ॥ प्रथमेऽहनियःपिंडस्तेनमूर्धाप्रजायते ॥ ग्रीवा
स्कंधौद्वितीयेनतृतीयाद्धृदयंभवेत् ॥ ५१ ॥ चतुर्थेनभवेत्पृष्ठंपंचमान्नाभिरेवच ॥ षष्ठेनचकटीगुह्यंसप्तमात्सक्थिनीभवेत् ॥ ५२ ॥ जानुपा
दौतथाद्वाभ्यांदशमेऽह्निक्षुधातृषा ॥ ५३ ॥ पिंडजंदेहमाश्रित्यक्षुधाविष्टस्तृषार्दितः ॥ एकादशंद्वादशंचप्रेतोभुंक्तेदिनद्वयं ॥ ५४ ॥ त्रयो
दशेऽहनिप्रेतोयन्त्रितोयमकिंकरैः ॥ तस्मिन्मार्गेव्रजत्येकोगृहीतइवमर्कटः ॥ ५५ ॥ षडशीतिसहस्राणियोजनानांप्रमाणतः ॥ यममार्ग
स्यविस्तारोविनावैतरणींखग ॥ ५६ ॥ अहन्यहनिवैप्रेतोयोजनानांशतद्वयं ॥ चत्वारिंशत्तथासप्तदिवारात्रेणगच्छति ॥ ५७ ॥ ॥

खाता है ॥ ५४ ॥ त्रयोदशवें दिन प्रेत यमदूतोंसे पकड़ाहुवा उसी मार्गमें अकेला जाता है. जैसे पाशसे गलेमें बँधाहुवा बंदर जाय तैसे ॥ ५५ ॥ हे गरुड़! उस यमके मार्गका बिस्तार वैतरणी नदीविना ८६००० हजार योजन है ॥ ५६ ॥ सो एकएक दिनमें प्रेत दोदोसौ योजन चलता तौ सप्तचत्वारिंश अर्थात् सैंतालीस ४७ दिन और रात्रिसे यमलोकको पहुँचता है ॥ ५७ ॥ ॥

उसमें काग, घुघुवा, सिकरा, गीध, मधुमक्षी, डांस ए घोर जीव भरेहैं. उस वनमें दावानलसहित वनके पत्तोंसे पापियोंका अंग छिन्न भिन्न होता है ॥ ८ ॥ और उस मार्गमें कहीं अंधकूपमें पड़ता है, कहीं विकट पर्वतसे पड़ता है, कहीं छूरेकी धारजैसी धारपर तथा लोहके शूलोंउपर चलता है, ॥ ९ ॥ कहीं भयंकर अँधेरेमें पड़ता है, कहीं जलमें पड़ता है, कहीं जोंकोंसे युक्त कीचड़में पड़ता है; कहीं बहोत् गरम तपाये हुये कीचड़में पड़ता है, ॥ १० ॥ कहीं तांबेके पात्रके नीचे अग्नि जलरही ऊपर बहुत गरम बालूमें चलता है, कहीं महान् धुँवां निकलते अंगा-

काकोलूकवटगृध्रसरघादंशसंकुलम् ॥ सदावाग्निचतत्पत्रैश्छिन्नभिन्नःप्रजायते ॥ ८ ॥ क्वचित्पतत्यंधकूपेविकटात्पर्वतात्क्वचित् ॥ गच्छतेक्षुरधारासुशंकूनामुपरिक्वचित् ॥ ९ ॥ स्खलत्यंधेतमस्युग्रेजलेनिपततिक्वचित् ॥ क्वचित्पंकेजलौकाढ्येक्वचित्संतप्तकर्दमे ॥ १० ॥ संतप्तवालुकाकीर्णेध्मातताम्रमयेक्वचित् ॥ क्वचिदंगारराशौचमहाधूमाकुलेक्वचित् ॥ ११ ॥ क्वचिदंगारवृष्टिश्चशिलावृष्टिःसवज्रका ॥ रक्तवृष्टिःशस्त्रवृष्टिःक्वचिदुष्णांबुवर्षणम् ॥ १२ ॥ क्षारकर्दमवृष्टिश्चमहानिम्नानिचक्वचित् ॥ वप्रप्ररोहणंक्वापिकंदरेषुप्रवेशनं ॥ १३ ॥ गाढांधकारस्तत्रास्तिदुःखारोहशिलाःक्वचित् ॥ पूयशोणितपूर्णाश्चविष्ठापूर्णाह्रदाःक्वचित् ॥ १४ ॥ ॥

रोंपर चलता है, ॥ ११ ॥ कहीं पापीके ऊपर अंगारवृष्टि होती है, कहीं शिलावृष्टि और वज्रवृष्टि होती है, कहीं रक्तवृष्टि तथा शस्त्रवृष्टि होती है, कहीं गरम पानीकी वर्षा होती है, ॥ १२ ॥ कहीं क्षारकीचड़की वर्षा होती है, कहीं महा खड्डेमें पड़ता है, कहीं गुफावोंमें पैठता है, ॥ १३ ॥ कहीं प्रबल अंधकार आता है, कहीं दुःखसे चढ़नेमें आवै ऐसी शिला आती है, कहीं पीब लोहीके भरे सरोवर आते हैं, कहीं बिष्ठासे भरे सरोवर

आते हैं ॥ १४ ॥ तहां मार्गमें घोर वैतरणी नदी बहती है वह देखीभई दुःखदेवे उसका तो क्या परंतु उसकी बातभी भय करती है ॥१५॥ वह सौ योजन चौड़ी हैं, पीब लोही बहती है, हाड़ोंके समूहोंसें तट बँधा भया है, दुःखसे जानेमें आती है, मांस और लोहीका कीचड़ है, ॥ १६ ॥ अगाध है, पापियोंसें दुस्तर है, केशशिवालोंसे दुर्गम है, बड़े ग्राहोंसें युक्त है, घोर सैकड़ों पक्षियोंसे भरी है ॥ १७ ॥ ऐसी बैतरणी आये पापीको देख, ज्वाला और धूमसे ब्याकुल हुई, हे गरुड़! औटीजाती है. जैसे प्रबल अग्निसें कटाहमें घृत होय तैसे॥ १८ ॥ और घोर कृमि-

मार्गमध्यवहात्युग्राघोरावैतरणीनदी ॥ साद्दष्टादुःखदाकिंवायस्यावार्ताभयावहा ॥ १५ ॥ शतयोजनविस्तीर्णापूयशोणितवा
हिनी ॥ अस्थिवृंदतटादुर्गामांसशोणितकर्दमा ॥ १६ ॥ अगाधादुस्तरापापैःकेशशैवालदुर्गमा ॥ महाग्राहसमाकीर्णाघोरपक्षिश
तैर्वृता ॥ १७ ॥ आगतंपापिनंदृष्ट्वाज्वालाधूमसमाकुला ॥ क्वथतेसानदीतार्क्ष्यकटाहांतर्घृतंयथा ॥ १८ ॥ कृमिभिःसंकुलाघोरैःसू
चीवक्त्रैःसमंततः ॥ वज्रतुंडैर्महागृध्रैर्वायसैःपरिवारिता ॥ १९ ॥ शिशुमारैश्चमकरैर्जलौकामत्स्यकच्छपैः ॥ अन्यैर्जलस्थजीवैश्चपू
रितामांसभेदकैः ॥ २० ॥ पतितास्तत्प्रवाहेचक्रंदंतिबहुपापिनः ॥ हाभ्रातःपुत्रताततिप्रलपंतिमुहुर्मुहुः ॥ २१ ॥ ॥

योंसे भरी है, कैसे कृमि हैं? कि-शुईजैसा जिनका मुख और वज्रजैसी तुंड ऐसे बड़े बड़े गीध और कागोंसे भरी है, ॥ १९ ॥ शिशुमार, मगर, जोंक, सर्प, मच्छी, कच्छप इन्होंसे और जलस्थजीवोंसे और मांस तोडनेवाले जीवोंसे पूर्ण ॥ २० ॥ ऐसी वैतरणीके प्रवाहमें पड़े बहोत पापी पुकारते हैं. हाभ्रातः! हापुत्र! हापितः! ऐसे वारंवार विलाप करते हैं ॥ २१ ॥ ॥ ॥ ॥

उसमें भूंखे प्यासे पापी लोहीको पीते हैं. वह नदी रुधिरका पूर बहती, बहोतसा फेना छोंड़ती है ॥ २२ ॥ महाघोर अत्यंत गर्जना करती, दुःखसे देखनेयोग्य और भय देती है. सो हे गरुड़! उसके देखनेसे पापी अचेत होजाते हैं॥ २३ ॥ बहोत बिच्छुवोंसे व्याप्त है, काले सर्पोंसे संयुक्त है, तिसके मध्यमें पड़ेहुवे पापियोंका कोई रक्षक नहीं है, ॥ २४ ॥ सैकड़ों हजारों भ्रमरजालोंमें हजारोंवार पातालमें जाते हैं. वे पापी क्षणमात्र पातालमें रहकर, क्षणसे फिर ऊपर आते हैं । २५ ॥ सो हे गरुड़! पापियोंके गिरनेके लियेही वह नदी रची गई है. उसका

क्षुधितास्तृषिताःपापाःपिबंतिकिलशोणितं ॥ सासरिद्रुधिरपूरंवहंतीफेनितंबहु ॥ २२ ॥ महाघोरातिगर्जंतीदुर्निरीक्ष्याभयावहा ॥ तस्यादर्शनमात्रेणपापाःस्युर्गतचेतनाः ॥ २३ ॥ [illegible]वृश्चिकसंकीर्णासेविताकृष्णपन्नगैः ॥ तन्मध्येपतितानांचत्राताकोऽपिनविद्यते ॥ २४ ॥ आवर्तशतसाहस्रैःपातालेयांतिपापिनः ॥ क्षणंतिष्ठंतिपातालेक्षणादुपरिवर्तिनः ॥ २५ ॥ पापिनांपतनायैवनिर्मिता सानदीखग ॥ नपारंदृश्यतेतस्यदुस्तराबहुदुःखदा ॥ २६ ॥ एवंबहुविधक्लेशेयममार्गेऽतिदुःखदे ॥ क्रोशंतश्चरुदंतश्चदुःखितायांति पापिनः ॥ २७ ॥ पाशेनयंत्रिताःकेचित्कृष्यमाणास्तथांकुशैः ॥ शस्त्राग्रैःपृष्ठतःप्रोतैर्नीयमानाश्चपापिनः ॥ २८ ॥ ॥

पार दीखता नहीं. बड़े दुःखसे तिरनेमें आती है. बहोत दुःख देती है ॥ २६ ॥ ऐसे बहोत प्रकारके क्लेश जिसमें ऐसे अति दुःखदेनेवाले यमभार्गमें पुकार करते रोते भये दुःखी पापी जाते हैं ॥ २७ ॥ कोई पाशसे बँधेभये, कोई अंकुशसे खींचे भये, पीठमें हथियारोंकी [illegible] चुभरहीं ऐसें पापियोंको दूत लेजाते हैं ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥

कोई नाशिकापाशसे बँधेभये तथा कर्णपाशसे बँधेभये, कोई कालपाशसे बंधेभये जाते हैं. तितने एकोंका काग चोंचोंसे खींचते हैं ॥ २९ ॥ कितेक ग्रीवा अर्थात् गला, भुजा, पाद, पीठ इन्होंमें शांकल वा जंजीरसे बँधे जाते हैं, कितेक लोहाके, भारके समूहको बहते मार्गमें जाते हैं ॥ ३० ॥ और महाघोर यमदूतोंसे मुद्गरकरके ताड़नाको प्राप्तभये मुखसे लोहीको वमन करते फेर उसकोही खाते हैं ॥ ३१ ॥ और जीव अपने कियेभये कर्मोंको शोच करते, ग्लानिको प्राप्त होते हैं. ऐसे अत्यंत दुःखित हुये यममंदिरमें जाते हैं ॥ ३२ ॥ तहां मार्गमें मन्दबुद्धिवा-

नासाग्रपाशकृष्टाश्चकर्णपाशैस्तथापरे ॥ कालपाशैःकृष्यमाणाःकाकैःकृष्यास्तथापरे ॥ २९ ॥ ग्रीवाबाहुषुपादेषुबद्धाःपृष्ठेचशृंखलैः ॥
अयोभारचयंकेचिद्वहंतःपथियांतिये ॥ ३० ॥ यमदूतैर्महाघोरैस्ताड्यमानाश्चमुद्गरैः ॥ वमंतोरुधिरंवक्त्रात्तदेवाश्नंतितेपुनः ॥ ३१ ॥
शोचंतेस्वानिकर्माणिग्लानिंगच्छंतिजंतवः ॥ अतीवदुःखसंपन्नाःप्रयांतियममंदिरं ॥ ३२ ॥ तथाचसव्रजन्मार्गेपुत्रपौत्रइतिब्रुवन् ॥
हाहेतिप्ररुदन्नित्यमनुतप्यतिमंदधीः ॥ ३३ ॥ महतापुण्ययोगेनमानुषंजन्मलभ्यते ॥ तत्प्राप्यनकृतोधर्मःकीदृशंहिमयाकृतं ॥ ३४ ॥
मयानदत्तंनहुतंहुताशनेतपोनतप्तंत्रिदशानपूजिताः ॥ नतीर्थसेवाविहिताविधानतोदेहिन्कचिन्निस्तरयत्त्वयाकृतं ॥ ३५ ॥

ले पुरुष हे पुत्र! हे पौत्र! ऐसे बोलते हाहा!! ऐसे रोतेहुये, नित्य तपायमान होते हैं ॥ ३३ ॥ विचारता है कि—महान् पुण्यके प्रभावसे मनुष्यजन्म प्राप्त होताहै उसको मिलनेपरभी धर्मसेवन नहीं करा. अहो! मैंनें कैसा अन्याय किया है ॥ ३४ ॥ मैंनें दान नहीं दिया अग्निमें हवन नहीं किया, तपभी नहीं किया, देवतोंकी पूजा नहीं करी, विधिसे तीर्थसेवा नहीं करी सो हे जीव! जो कुछ तुम कराहोता तौ इन दुःखोंको

तिरते ॥ ३५ ॥ अहो! मैनै विप्रमंडलीभी पूजी नहीं, श्रीगंगासेवनभी किया नहीं, सत्पुरुषोंकी टहलभी नहीं करी, कभीभी परोपकार नहीं किया, सो हे जीव! कुछ तुमने उत्तम संचय किया होता तौ उनके प्रभावसे इन दुःखोंको तिरते ॥ ३६ ॥ देखो! मैंने मनुष्य वा पशुपक्षी-के वास्ते निर्जल देशमें जल[illegible] सरोवरभी नहीं [illegible]या, अहो! गौ ब्राह्मणोंकी जीविकाके लिये कुछ न किया. सो हे जीव! कुछ किया हो तो तुम इन दुःखसमुद्रोंको तिरो ॥ ३७ ॥ नित्य दानभी नहीं किया, गौको एक दिन तृप्तजितना तृणादिकभी दिया नहीं और स्नान, सं-

नपूजिताविप्रगणाःसुरापगानचाश्रिताःसत्पुरुषा[illegible]सेविताः ॥ परोपकारानकृताःकदाचनदेहिन्कचिन्निस्तरयत्त्वयाकृतम् ॥ ३६ ॥
जलाश्रयोनैवकृतोहिनिर्जलेमनुष्यहेतोःपशुपक्षिहेतवे ॥ गोविप्रवृत्त्यर्थमकारिनाण्वपिदेहिन्कचिन्निस्तरयत्त्वयाकृतम् ॥ ३७ ॥
ननित्यदानंनगवाह्निकंकृतंनवेदशास्त्रार्थवचःप्रमाणितम् ॥ श्रुतंपुराणंनचपूजितोज्ञोदेहिन्कचिन्निस्तरयत्त्वयाकृतम् ॥ ३८ ॥ भ
र्तुर्मयानैवकृतंहितंवचःपतिव्रतंनैवकदापिपालितम् ॥ नगौरवंक्वापिकृतंगुरूचितंदेहिन्कचिन्निस्तरयत्त्वयाकृतम् ॥ ३९ ॥ ॥

ध्या, जप, होमादि नित्यकर्म नहीं किये वेदशास्त्रका वाक्यभी प्रमाण नहीं माना, पुराण सुनके, वक्ताकी पूजा नहीं करी. सो हे जीव! कुछ तुमने कियाहो तौ दुःखसमुद्रको तिरो ॥ ३८ ॥ ऐसे मार्गमें पुरुष विलाप करते हैं. अब स्त्रीका विलाप कहते हैं—मैंनें पतिका हितकारी वाक्यभी नहीं किया, पतिव्रताका धर्मभी कभी नहीं पाला, सासु श्वसुरआदि बड़ोंकी चरणसेवादि कभी नहीं किया. सो हे जीव! तुमने कुछ किया हो तो तौ दुःखसमुद्रको तिरो ॥ ३९ ॥ ॥ ॥ ॥

यह स्त्रीको धर्म है ऐसे मान कभी पतिसेवाभी नहीं करी, पति मरेबाद पतिकी चितामें प्रवेशभी नहीं किया, विधवा होकर, तपसेवन नहीं
किया. सो हे जीव! कुछ तुमने किया होतो दुःखसमुद्रको तिरो ॥ ४० ॥ मासोपवाससे मैनें शरीरभी नहीं सुखाया वा चांद्रायण व्रतादिक
बड़े विस्तारका नियमभी धारण नहीं किया. देखो! स्त्रीका शरीर बहोत दुःखोंको पात्र मेरे पूर्वकिये कुकर्मोंसे प्राप्त हुवा ॥ ४१ ॥ ऐसा
पुरुष और स्त्री बहुतसा विलाप करते पूर्वजन्मका कर्म स्मरण करते मनुष्यजन्म हमारा कहांहै? ऐसे पुकारते जाते हैं ॥ ४२ ॥ सत्रह दि-

नधर्मबुद्ध्यापतिरेवसेवितोवह्निप्रवेशोनकृतोमृतेपतौ ॥ वैधव्यमासाद्यतपोनसेवितंदेहिन्कचिन्निस्तरयत्त्वयाकृतम् ॥ ४० ॥ मासो
पवासैर्नविशोषितंमयाचांद्रायणैर्वानियमैःसविस्तरैः ॥ नारीशरीरंबहुदुःखभाजनंलब्धंमयापूर्वकृतैर्विकर्मभिः ॥ ४१ ॥ एवंविल
प्यबहुशोसंस्मरन्पूर्वदैहिकम् ॥ मानुषत्वंममकुतइतिक्रोशन्प्रसर्पति ॥ ४२ ॥ दशसप्तदिनान्येकोवायुवेगेनगच्छति ॥ अष्टादशेदि
नेतार्क्ष्यप्रेतःसौम्यपुरंव्रजेत् ॥ ४३ ॥ तस्मिन्पुरवरेरम्येप्रेतानांचगणोमहान् ॥ पुष्पभद्रानदीतत्रन्यग्रोधःप्रियदर्शनः ॥ ४४ ॥ पुरे
तत्रसविश्रामंप्राप्यतेयमकिंकरैः ॥ दारपुत्रादिकंसौख्यंस्मरतेतत्रदुःखितः ॥ ४५ ॥ ॥ ॥

नतौ अकेले वायुजैसे वेगसे चलता है. अठरहवें दिन हे गरुड़! प्रेत सौम्यपुर जाता है ॥ ४३ ॥ उस रमणीक पुरमें बड़ा प्रेतोंका गण
रहता है. तहां पुष्पभद्रा नाम नदी है. और सुंदर है दर्शन जिसको ऐसा वट है ॥ ४४ ॥ तिस पुरमें वोह प्रेत विश्राम लेता है. वहां स्त्री
पुत्रादिकोंको सुख स्मरण करता, दुःखी होता है ॥ ४५ ॥ ॥ ॥ ॥

जब धन भृत्यजनोंको और सब कुटुंबको शोच हैं तब वहांके दूत ऐसे कहते हैं ॥ ४६ ॥ अरे मूर्खो! वोह धन कहां है? वे पुत्र कहां है? वह स्त्री कहां है? वोह मित्र कहां बंधु कहां हैं? अपने कर्मोंका संबंध भोगताहुवा बहोतकाल इसमार्गमें जायगा ॥ ४७ ॥ अरे हे परलोकपांथ तुम क्या नहीं जानते हौ? कि—राहगीरोंको एक रस्ताका खर्चेही बल है दूसरा नहीं. यदि जानते हवौ तो खर्चेके अर्थ यत्न क्यों नहीं करते. अर्थात् दान धर्मादि क्यों नहीं करते. क्योंकि जिस मार्गमें कुछ बेंचनेखरीदनेका ब्यापार नहीं है ऐसे मार्गसे जाना

धनानिभृत्यमात्राणिसर्वंशोचतिवैयदा ॥ तदाप्रेतांस्तुतत्रत्याःकिंकराश्चेदमब्रुवन् ॥ ४६ ॥ क्वधनंक्वसुताजायाक्वसुहृत्क्वचबांधवाः ॥ स्वकर्मोपार्जितंभोक्तामूढयाहिचिरंपथि ॥ ४७ ॥ जानासिसंबलबलंबलमध्वगानांनोसंबलाययतसेपरलोकपांथ ॥ गंतव्यमस्तितवनिश्चितमेवतेनमार्गेणयत्रभवतिक्रयविक्रयोहि ॥ ४८ ॥ आबालख्यातमार्गोऽयंनैवमर्त्यश्रुतस्त्वया ॥ पुराणसंभवंवाक्यंकिंद्विजेभ्योऽपिनश्रुतम् ॥ ४९ ॥ एवमुक्तस्ततोदूतैस्ताड्यमानश्चमुद्गरैः ॥ निपतन्नुत्पतन्धावन्पाशैराकृष्यतेबलात् ॥ ५० ॥ अत्रदत्तंसुतैःपौत्रैःस्नेहाद्वाकृपयाथवा ॥ मासिकंपिंडमश्नातिततःसौरिपुरंव्रजेत् ॥ ५१ ॥ ॥ ॥

तुम्हें जरूर पड़ैगा ॥ ४८ ॥ बालकसे लेकर, वृद्धतक सब जानते हैं. ऐसा यह मार्ग तुमनें नहीं सुना वा पुराण गा रहे ऐसे ब्राह्मणोंका वाक्य नहीं सुना ॥ ४९ ॥ ऐसे दूतोंसे कहा गया, मुद्गरोंसें ताड़ित हुवा पड़ता है. फेर उठकर, डरसे भागता है, भागते हुवेको पाशोंसे बांधकर, फेर बलसे खींचते हैं ॥ ५० ॥ यहां पुत्र और नातियोंकरके स्नेहसे वा दयासे दियेभये मासिक पिंडका भोजन करके, पीछे सौ-

रिपुरमें जाता है ॥ ५१ ॥ तहां जंगम नाम राजा कालरूप धारण करनेवाला है. उसको देख, भयसे डराहुवा प्राणी विश्राम लेनेको बुद्धि करता है ॥ ५२ ॥ अन्नसहित जल उस पुरमें जाकर, त्रिपाक्षिक श्राद्धमें दिया खाता है. पीछे उस पुरको प्राणी उल्लंघन करता है ॥ ५३ ॥ फेर प्रेत नगेंद्रभवनमें वेगसे जाता है, वहाँ भयंकर वनोंको देखकर, दुःखी हुत्रा पुकार करता है ॥ ५४ ॥ निर्दय यमदूतोंसे खींचा भय

तत्रनाम्नास्तिराजावैजंगमःकालरूपधृक् ॥ तद्दृष्ट्वाभयभीतोऽसौविश्रामेकुरुतेमतिम् ॥ ५२ ॥ उदकंचान्नसंयुक्तंभुंक्तेतत्रपुरेगतः ॥ त्रैपाक्षिकेवैयद्दत्तंसतत्पुरमतिक्रमेत् ॥ ५३ ॥ ततोनगेंद्रभवनंप्रेतोयातित्वरान्वितः ॥ वनानितत्ररौद्राणिदृष्ट्वाक्रंदतिदुःखितः ॥ ५४ ॥ निर्घृणैःकृष्यमाणस्तुरुदतेचपुनःपुनः ॥ मासद्वयावसानेतुतत्पुरंव्यथितोव्रजेत् ॥ ५५ ॥ भुक्त्वापिंडंजलंवस्त्रंदत्तंयद्बांधवैरिह ॥ कृष्यमाणःपुनःपाशैर्नीयतेऽग्रेचकिंकरैः ॥ ५६ ॥ मासेतृतीयेसंप्राप्तेप्राप्यगंधर्वपत्तनम् ॥ तृतीयमासिकंपिंडंतत्रभुक्त्वाप्रसर्पति ॥ ५७ ॥ शैलागमंचतुर्थेचमासिप्राप्नोतिवैपुरम् ॥ पाषाणास्तत्रवर्षंतिप्रेतस्योपरिभूरिशः ॥ ५८ ॥

प्रेत वारंवार रोदन करता है, दो महीनेके अंतमें उस पुरमें पहुँचता है ॥ ५५ ॥ जो बांधवोंसे यहां दिया पिंड, जल, वस्त्र, भोगकर फेर यमदूतोंसे पाशोंसे खींचा जाता अगाड़ी जाता है ॥ ५६ ॥ तीसरे मासमें गंधर्वनगरमें जाकर, तीसरे मासके पिंडादिक वहां भोगकर, अंगाड़ी जाता है ॥ ५७ ॥ चौथें मासमें शैलागमपुरमें जाता है. तहां प्रेतके ऊपर बहुतसे पत्थर वर्षते हैं ॥ ५८ ॥ ॥ ॥

वहां चौथे मासका, पिंड भोजन कर कुछ सुखी होता है. पीछे प्रेत पंचममासमें क्रौंचपुरमें जाता है ॥ ५९ ॥ तहां क्रौंचपुरमें प्रेत जो हाथसे दिया हो उसको खाता है. साढ़े पांच मासके पिंड खाकर, क्रूरपुरमें जाता है ॥ ६० ॥ वहां साढ़े पांचमासमें न्यूनषाण्मासिक होता है उसमें दिये हुए पिंड और घटसे कुछ तृप्त हुवा स्थित रहता है ॥ ६१ ॥ वहां आधा मुहूर्त विश्राम लेकर, कंपायमान, अतिदुःखित हुवा उस पुरको त्यागकर, यमदूतोंसे डरा हुवा

चतुर्थमासिकंपिंडंभुक्त्वाकिंचित्सुखीभवेत् ॥ ततोयातिपुरंप्रेतःक्रौंचंमासेऽथपंचमे ॥ ५९ ॥ हस्तदत्तंतदाभुंक्तेप्रेतःक्रौंचपुरेस्थितः ॥ यत्पंचमासिकंपिंडंभुक्त्वाक्रूरपुरंव्रजेत् ॥ ६० ॥ सार्धकैःपंचभिर्मासैर्न्यूनषाण्मासिकंव्रजेत् ॥ तत्रदत्तेनपिंडेनघटेनाप्यायितःस्थितः ॥ ६१ ॥ मुहूर्तार्धंतुविश्रम्यकंपमानःसुदुःखितः ॥ तत्पुरंतुपरित्यज्यतर्जितोयमकिंकरैः ॥ ६२ ॥ प्रयातिचित्रभवनंविचित्रोनामपार्थिवः ॥ यमस्यैवानुजोभ्रातायत्रराज्यंप्रशास्तिहि ॥ ६३ ॥ तंविलोक्यमहाकायंयदाभीतःपलायते ॥ तदासंमुखआगत्यकैवर्ताइदमब्रुवन् ॥ ६४ ॥ वयंतेतर्तुकामायमहावैतरणींनदीम् ॥ नावमादायसंप्राप्तायदितेपुण्यमीदृशम् ॥ ६५ ॥ दानंवितरणंप्रोक्तंमुनिभिस्तत्त्वदर्शिभिः ॥ इयंसातीर्यतेयस्मात्तस्माद्वैतरणीस्मृता ॥ ६६ ॥ ॥ ॥ ॥ ॥

॥ ६२ ॥ चित्रनाम भवनमें जाता है. जहां विचित्रनाम राजा है. यमराजका छोटा भाई उस राजमें दंड देता है तथा राज करता है ॥ ६३ ॥ उसको भयंकर शरीर देखकर, जब डराहुवा दौड़ता है तब सन्मुख आकर, नाव चलानेवाले ए बोलते हैं ॥ ६४ ॥ अरे ! हम तुम्हारेको महावैतरणी नदी उतारनेको नाव लेकर, आये हैं. सो तुम्हारो नावमें बैठनेको पुण्य हो तो बैठो ॥ ६५ ॥ तत्वज्ञान जाननेवाले मुनियोंनें दानको वितरण कह्या है सो जिससे उस

वितरणसे यानी दानसे तरी जाती है. तिससे इसका नाम वैतरणी है॥६६॥जो तुमने गोदान किया है तो नौका समीप आयेगी नहीं किया तो नहीं आयेगी ऐसे उनका बचन सुनके, हा दैव! ऐसा पुकारता है॥ ६७ ॥ उसको देखके, वह नदी औटीजाती है. उस नदीको देख, प्रेत पुकारता है. सो दान नहीं देनेवाला पापी उसीमें डूबता है ॥६८॥ उस पापीके मुखमें भाला देकर, आकासमें चलनेवाले दूत जैसे मत्स्यवेधकशस्त्र (कटिया)से मत्स्यको बेधै तैसे पार लेजाते हैं॥६९॥ छठे मासका पिंड वहां खाकर, चलता है सो मार्गमें विलाप करताहुवा जाता है. भूखसे अतिपीड़ितहुवा ॥७०॥

यदित्वयाप्रदत्तागौस्तदानौरुपसर्पति ॥ नान्यथेतिवचस्तेषांश्रुत्वाहादैवभाषते ॥ ६७ ॥ तंदृष्ट्वाक्वथ्यतेसातुतांदृष्ट्वासोऽतिक्रंदते ॥ अदत्तदानःपापात्मातस्यामेवनिमज्जति ॥ ६८ ॥ तन्मुखेकंटकंदत्वादूतैराकाशसंस्थितैः ॥ बडिशेनयथामत्स्यस्तथापारंप्रणीयते ॥६९॥ षाण्मासिकंचयत्पिंडंतत्रभुक्त्वाप्रसर्पति ॥ मार्गेसविलपन्यातिबुभुक्षापीडितोह्यलम् ॥७०॥ सप्तमेमासिसंप्राप्तेपुरंबह्वापदंव्रजेत् ॥ तत्रभुंक्तेप्रदत्तंयत्सप्तमेमासिपुत्रकैः ॥ ७१ ॥ तत्पुरंतुव्यतिक्रम्यदुःखदंपुरमृच्छति ॥ महद्दुःखमवाप्नोतिखेगच्छन्खेचरेश्वर ॥ ७२ ॥ मास्यष्टमेप्रदत्तंयत्पिंडंभुक्त्वाप्रसर्पति ॥ नवमेमासिसंपूर्णेनानाक्रंदपुरंव्रजेत् ॥ ७३ ॥ ॥ ॥

सातवें मासमें बह्वापदनाम पुरमें जाता है तहां सप्तम मासमें पुत्रसे जो दिया सो खाता है ॥ ७१ ॥ उस पुरको उल्लंघन कर, दुःखदनाम पुरमें जाता है. हे गरुड़! उस पुरमें बड़ा दुःख पाता है ॥ ७२ ॥ और अष्टम मासमें दियाहुवा पिंड वहां खाकर, चलता है सो नवत्रें मासके अंतमें नानाक्रंद नाम पुरमें जाता है॥ ७३ ॥ ॥ ॥ ॥

अतिदारुण पुकार रहे ऐसे नानाक्रंदगणोंको देखकर, आपही शून्य भया है हृदय ऐसा प्रेत दुःखी हुवा पुकार करता है ॥ ७४ ॥ यमदूतोंसे डरायाहुवा प्रेत उस पुरको त्यागकै दशवें मासमें कष्टसें सुतप्त भवनमें जाता है ॥ ७५ ॥ तहां पिंडदान और जल भोजन करकैभी नहीं सुखी होता है, एकादशवां म[illegible] पूरा हुए वोह प्रेत रौद्रपुरमें पहुँचता है ॥७६॥ एकादशवें मासका वहां पुत्रादिकोंसे दिया खाकर, साढ़ेग्यारा मासमें पयो-

नानाक्रंदगणान्दृष्ट्वाक्रंद[illegible]ान्सुदारुणान् ॥ स्वयंचशून्यहृदयःसमाक्रंदतिदुःखितः ॥ ७४ ॥ विहायतत्पुरंप्रेतस्तर्जितो यमकिंकरैः ॥ सुतप्तभव[illegible]च्छेद्दशमेमासिकृच्छ्रतः ॥ ७५ ॥ पिंडदानंजलंतत्रभुक्त्वापिनसु[illegible]॥ मासिचैकादशे पूर्णेपुरंरौद्रंसगच्छति ॥ ७[illegible] ॥ दशैकमासिकंतत्रभुंक्तेदत्तंसुतादिभिः ॥ सार्धेचैकादशेमासिपयोवर्षणमृच्छति ॥ ७७ ॥ मेघास्तत्रप्रवर्षंतिप्रेतानांदुःखदायकाः ॥ न्यूनाब्दिकंचयच्छ्राद्धंतत्रभुंक्तेसदुःखितः ॥ ७८ ॥ संपूर्णेतुततोवर्षेशीताढ्यंनगरंव्रजेत् ॥ हिमाच्छतगुणंतत्रमहाशीतंतपत्यपि ॥ ७९ ॥ शीतार्तःक्षुधितःसोऽपिवीक्षतेहिदिशोदश ॥ तिष्ठतेबांधवःकोऽपियोमेदुःखंव्यपोहति ॥ ८० ॥ ॥ ॥ ॥ ॥

वर्षणनाम पुरमें जाता है ॥ ७७ ॥ तहां मेघ प्रेतोंको दुःखदायक वर्षा करते हैं. न्यूनाब्दिक जो श्राद्ध सो दुःखी हुवा प्रेत तहां भोगता है ॥ ७८ ॥ और वर्ष पूरेहुये पीछे, शीताढ्यनाम नगरमें जाता है तहां बरफसेभी सौगुणा महाशीत पड़ता है ॥ ७९ ॥ शीतसे पीड़ित हुवा, भूंखा वोह प्रेत दशोंदिशावोंमें देखता है कि—जो मेरो दुःखको नाश करै एसो कोई बांधव है ॥ ८० ॥ ॥

तहां वे दूत बोलते हैं-अरे! तुम्हारा अभी रक्षा करै ऐसा पुण्य कहां है. फेर वार्षिक पिंड वहां खाकर, धीरजताको प्राप्त होता है ॥ ८१ ॥ अ-गाड़ी वर्ष पूरेहुये यमको स्थान नजीक आया. तब बहुभीति पुरमें जाकर, हस्तमात्र शरीरको त्यागता है ॥ ८२ ॥ हे गरुड़! अंगुष्ठप्रमाण जीव कर्म भोगनेको यातनादेहको प्राप्त होकर, यमदूतोंके संग जाता है ॥ ८३ ॥ हे गरुड़! पारलौकिक दान जिन्होंनें नहीं दिया है वे दृढ बंध-

किंकरास्तेवदंत्यत्रकृतेपुण्यंहितादृशम् ॥ भुक्त्वाचवार्षिकंपिंडंधैर्यमालंबतेपुनः ॥ ८१ ॥ ततःसंवत्सरस्यांतेप्रत्यासन्नेयमालये ॥
बहुभीतिपुरेगत्वाहस्तमात्रंसमुत्सृजेत् ॥ ८२ ॥ अंगुष्ठमात्रोवायुश्चकर्मभोगायखेचरः ॥ यातनादेहमासाद्यसहयाम्यैःप्रयातिच
॥ ८३ ॥ और्ध्वदेहिकदानानियैर्नदत्तानिकाश्यप ॥ एवंकष्टेनयेयांतिगृहीतादृढबंधनैः ॥ ८४ ॥ धर्मराजपुरेसंतिचतुर्द्वाराणिखे
चर ॥ तत्रायंदक्षिणद्वारमार्गस्तेपरिकीर्तितः ॥ ८५ ॥ अस्मिन्पथिमहाघोरेक्षुत्तृषाश्रमपीडिताः ॥ यथायांतितथाप्रोक्तंकिंभूयःश्रो
तुमिच्छसि ॥ ८६ ॥ इतिश्रीगरुडपुराणेसारोद्धारेयममार्गनिरूपणंनामद्वितीयोऽध्यायः ॥ २ ॥ गरुडउवाच ॥ यममार्गमतिक्र
म्यगत्वापापीयमालये ॥ कीदृशींयातनांभुंक्तेतन्मेकथयकेशव ॥ १ ॥ ॥ ॥ ॥

नोंसे बँधे ऐसे कष्टसे जाते हैं ॥ ८४ ॥ हे गरुड़! धर्मराजके पुरमें चार द्वार हैं. तहां तुम्हारेको यह दक्षिण द्वार वर्णन किया है ॥ ८५ ॥ इस महाघोर मार्गमें क्षुधा, प्यास, परिश्रम इन्होंसे पीड़ित जैसे पापी जाते हैं तैसे तुम्हारेको कह्या फेर क्या सुननेकी इच्छा है ॥ ८६ ॥ इति श्री-गरुडपुराणस्य ज्ञानबोधिनीभाषाटीकायां यममार्गनिरूपणं नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥ गरुड़जी बोले कि- हे केशव! यमके मार्गका

उल्लंघनकरके पापी यमराजके स्थानमें जाकर, कैसी यातना भोगते हैं सो कहो ॥ १ ॥ अब श्रीभगवान कहते हैं– हे विनताके पुत्र! आदिसे अंततक कहता हूं. नरकोंको कहनेसे तुम कंपायमान होवोगे ॥ २ ॥ सो हेगरुड़! ४४ योजन बहुभीतिपुरसे अगाड़ी धर्मराजका महान् पुर है ॥ ३ ॥ उस पुरको हाहाकारसे संयुक्त देखकर, पापी पुकार करता है. यमराजके पुरवाशी दूत उस पुकारको सुनके, ॥ ४ ॥ जहां द्वारपालसे

श्रीभगवानुवाच ॥ ॥ आद्यंतंचप्रवक्ष्यामिशृणुष्वविनतात्मज ॥ कथ्यमानेपिनरकेत्वंभविष्यसिकंपितः ॥ २ ॥ चत्वारिंशद्योजनानिचतुर्युक्तानिकाश्यप ॥ बहुभी[illegible]दग्रेधर्मराजपुरंमहत् ॥ ३ ॥ हाहाकारसमायुक्तंदृष्ट्वाक्रंदतिपातकी ॥ तत्क्रंदितंसमाकर्ण्ययमस्यपुरचारिणः ॥ ४ ॥ गत्वाचतत्रतेसर्वेप्रतीहारंवदंतिहि ॥ धर्मध्वजःप्रतीहारस्तत्र[illegible]ष्ठतिसर्वदा ॥ ५ ॥ [illegible]त्वाचित्रगुप्ता[illegible]स्यशुभाशुभम् ॥ ततस्तंचित्रगुप्तोऽपिधर्मराजंनिवेदयेत् ॥ ६ ॥ नास्तिकाये[illegible]स्ताक्ष्र्यमहापापरताःसदा ॥ तांश्चसर्वान्यथा[illegible]ंसम्यग्जानातिधर्मराट् ॥ ७ ॥ तथापिचित्रगुप्तायतेषां[illegible]पृच्छति ॥ चित्रगुप्तोऽपिसर्वज्ञःश्रवणान्परिपृच्छति ॥ ८ ॥ ॥ ॥ ॥

कहते हैं तहां धर्मध्वज प्रतीहार सदा रहता है ॥ ५ ॥ वोह प्रतीहार चित्रगुप्तके पास जाकर, कहता है–फेर चित्रगुप्त उसको सब शुभ, अशुभ, अर्थात् पुण्य पाप, धर्मराजको कहता हैं ॥ ६ ॥ हे गरुड़! जो नास्तिक मनुष्य हैं सदा महापाप करते हैं उन सबको यथार्थ धर्मराज जानते हैं ॥ ७ ॥ तौभी चित्रगुप्तसे उन्होंका पुण्य पाप पूंछते हैं. चित्रगुप्त सब जानते हैं परंतु श्रवण देवतोंके प्रति पूछता है ॥ ८ ॥ ॥

श्रवण ब्रह्माके पुत्र हैं स्वर्ग, पृथ्वी, पातालमें विचरते हैं. और बहोत दूरसे सुनलेते हैं, दूरसे देखलेते हैं ॥ ९ ॥ उन्होंकी स्त्रियांभी तैसीही हैं. श्रवणी नामसे कहीजाती हैं. वह स्त्रियोंकी सब चेष्टा जानती हैं ॥ १० ॥ मनुष्य गुप्त वा प्रत्यक्ष जो कहींभी कहता तथा करता है सो सब चित्रगुप्तको वह श्रवण और श्रवणी कहती हैं ॥ ११ ॥ वे धर्मराजके चार हैं अर्थात् हरकाला हैं. मनुष्योंके मन, वाणी शरीरसे कियेहुवे

श्रवणाब्रह्मणःपुत्राःस्वर्भूपातालचारिणः ॥ दूरश्रवणविज्ञानाद्दूरदर्शनचक्षुषः ॥ ९ ॥ तेषांपत्न्यस्तथाभूताःश्रवण्यःपृथगाह्वयाः ॥ स्त्रीणांविचेष्टितंसर्वंताविजानंतितत्त्वतः ॥ १० ॥ नरैःप्रच्छन्नंप्रत्यक्षंयत्प्रोक्तंचकृतंचयत् ॥ सर्वमावेदयंत्येवचित्रगुप्तायतेचताः ॥ ११ ॥ चारास्तेधर्मराजस्यमनुष्याणांशुभाशुभम् ॥ मनोवाक्कायजंकर्मसर्वंजानंतितत्त्वतः ॥ १२ ॥ एवंतेषांशक्तिरस्तिमर्त्यामर्त्याधिकारिणाम् ॥ कथयंतिनृणांकर्मश्रवणाःसत्यवादिनः ॥ १३ ॥ व्रतैर्दानैश्चसत्योक्त्यायस्तोषयतितान्नरः ॥ भवंतितस्यतेसौम्याःस्वर्गमोक्षप्रदायिनः ॥ १४ ॥ पापिनांपापकर्माणिज्ञात्वातेसत्यवादिनः ॥ धर्मराजपुरःप्रोक्ताजायंतेदुःखदायिनः ॥ १५ ॥

पुण्य पाप सब यथार्थ जानते हैं ॥ १२ ॥ ऐसे मनुष्य और देवतावोंके अधिकारी श्रवण देवतावोंकी शक्ति है सो सत्यवादी श्रवण मनुष्योंका कर्म कहते हैं ॥ १३ ॥ व्रतकरनेसे दानसे सत्य बोलनेसे जो मनुष्य उनको प्रसन्न करता है उनको वे श्रवण प्रसन्नहुये स्वर्ग मोक्षके दाता होते हैं ॥ १४ ॥ और पापियोंके पापकर्म वे सत्यवादी श्रवण जानकर, धर्मराजके पुरमें कहे दुःखोंके दायक होते हैं ॥ १५ ॥

और सूर्य, १ चंद्रमा, २ वायु, ३ अग्नि, ३ स्वर्ग, ५ पृथ्वी, ६ जल, ७ हृदय, ८ यम, ९ दिन, १० रात्रि, ११ प्रातःसंध्या, १२ सायंसंध्या, १३ और धर्मराज, ए सब मनुष्यका वृत्तांत जानतेहैं ॥ १६ ॥ और धर्मराज, चित्रगुप्त, सूर्य, श्रवण, इत्यादि ए शरीरमें स्थित सब पुण्य पापको जानते हैं ॥ १७ ॥ यमराज ऐसे पापियोंके पापको निश्चय कर, उन पापियोंको बुलाय, अपना अतिभयानक रूप दिखाते हैं ॥ १८ ॥ वे पापी भयंकर यमरूपको देखते हैं, कैसा रूप है दंड हाथमें है, बड़ा शरीर है, भैंसापर बैठे हैं, ॥ १९ ॥ प्रलयके मेघके समान

आदित्यचं [illegible]वनिलोऽनलश्चद्यौर्भूमिरापोहृदयंयमश्च ॥ अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तम् ॥१६॥ धर्मराजश्चित्रगुप्तः श्रवणाभास्करादयः ॥ कायस्थं [illegible]श्यंतिपापंपुण्यंच[illegible]शः ॥ १७ ॥ एवंसुनिश्चयंकृत्वापापिनांपातकंयमः ॥ आहूयतान्निजंरूपंदर्शयत्यतिभीषणम् ॥१८॥ प[illegible]श्यंतियमरूपंभयंकरम् ॥ दंडहस्तंमहाकायंमहिषोपरिसंस्थितम् ॥ १९ ॥ प्रलयांबुदनिर्घोषंकज्जलाचलसन्निभम् ॥ विद्युत्प्रभायुधैर्भीमंद्वात्रिंशद्भुजसंयुतम् ॥ २० ॥ योजनत्रयविस्तारंवापीतुल्यवि[illegible] ॥ दंष्ट्राकरालवदनंरक्ताक्षंदीर्घनासिकम् ॥ २१ ॥ मृत्युज्वरादिभिर्युक्तश्चित्रगुप्तोऽपिभीषणः ॥ सर्वेदूताश्चगर्जंतियमतुल्यास्तदंतिके ॥ २२ ॥ ॥

गर्जना करते हैं, कज्जलाचलपर्वतजैसा स्वरूप है, विजलीजैसे शस्त्रोंसे भयंकर हैं, ३२ भुजा हैं ॥ २० ॥ और बारह कोश तीन योजन अर्थात् चौड़े लंबे हैं, बावड़ीजैसे नेत्र हैं, दाढ़ोंसे विकराल मुख हैं, रक्तनेत्र हैं, लंबी नासिका है ॥ २१ ॥ ऐसे मृत्युज्वरादिकोंसे युक्त चित्रगुप्तभी भयंकररूप, सब दूतभी यमराजजैसे पापियोंके नजीक गर्जना करै हैं ॥ २२ ॥ ॥ ॥ ॥

उन सबको देख, वोह दुष्ट भयभीत हो, हाय! हाय!! ऐसे बोलता है. नहीं दिया है दान, ऐसा पापी कंपायमान होता है फेर पुकारता है
॥ २३ ॥ तहां सब पुकाररहे और अपने कर्मोंको शोचरहे ऐसे पापियोंको यमकी अज्ञासे चित्रगुप्त कहते हैं ॥ २४ ॥ हे पापियो! तुम दुरा-
चारी हो, हम हैं ऐसे गर्वितहो, सो अरे मूर्खो! तुमने काहेके वास्ते पापसंचय किया ॥ २५ ॥ कामभोग तथा क्रोधसे होनेवाले तथा पापि-

तंदृष्ट्वाभयभीतस्तुहाहेतिवदतेखलः ॥ अदत्तदानःपापात्माकंपतेक्रंदतेपुनः ॥ २३ ॥ ततोवदतितान्सर्वान्क्रंदमानांश्चपा
पिनः ॥ शोचतःस्वानिकर्माणिचित्रगुप्तोयमाज्ञया ॥ २४ ॥ भोभोःपापादुराचाराअहंकारप्रदूषिताः ॥ किमर्थमर्जितंपापं
युष्माभिरविवेकिभिः ॥ २५ ॥ कामक्रोधाद्यदुत्पन्नंसंगमेनचपापिनाम् ॥ तत्पापंदुःखदंमूढाःकिमर्थंचरितंजनाः ॥ २६ ॥
कृतवंतःपुरायूयंपापान्यत्यंतहर्षिताः ॥ तथैवयातनाभोग्याः किमिदानींपराङ्मुखाः ॥ २७ ॥ कृतानियानिपापानियुष्मा
भिःसुबहून्यपि ॥ तानिपापानिदुःखस्यकारणंचनवंचना ॥ २८ ॥ मूर्खेपिपंडितेवापिदरिद्रेवाश्रियान्विते ॥ सबलेनिर्बले
वापिसमवर्तीयमःस्मृतः ॥ २९ ॥ ॥ ॥ ॥

योंके संगसे होनेवाले और दुःखदेनेवाले उस पापको हे मनुष्यो! क्यों संचय किया ॥ २६ ॥ जैसे पहले तुम पापोंको बड़ी खुसीसे किये हो तै-
सेही यमकी यातना भी भोगो. अब क्यों पीछे मुख करते हो ॥ २७ ॥ जो तुमनें बहुतसे पाप करेहैं वे सब दुःखके कारण हैं टलैंगे नहीं ॥ २८ ॥
क्योंकि मूर्खमें, पंडितमें, दरिद्रीमें, लक्ष्मीवालेमें, सबलमें, निर्बलमें, यम तो समवर्ती कहे हैं ॥ २९ ॥ ॥ ॥

दे पापी ऐसे चित्रगुप्तके वाक्य सुनकर, अपने कर्मोंके दुःख स्मरण करते, चुप हुवे निश्चल स्थित रहते हैं ॥ ३० ॥ धर्मराजभी पापी उन्होंको चोरजैसे निश्चल स्थितहुए देख, यथायोग्य दंड देनेको दूतोंको आज्ञा करते हैं ॥ ३१ ॥ पीछे वे निर्दई दूत ताड़ना देकर, बोलते हैं— हे पापिन् ! महाघोर अतिभयंकर नरकोंमें चलो ॥ ३२ ॥ यमके आज्ञाकारी प्रचंड चंडकआदिक वे दूत एकपाशमें उन सबोंको बांध, नरकोंमें

चित्रगुप्तस्येतिवाक्यंश्रुत्वातपापिनस्तदा ॥ शोचंतःस्वानिकर्माणितूष्णींतिष्ठंतिनिश्चलाः ॥ ३० ॥ धर्मराजोऽपितान्दृष्ट्वा चोरवन्निश्चलान्स्थितान् ॥ आज्ञापयतिपापानांशास्तिंचैवयथोचिताम् ॥ ३१ ॥ ततस्तेनिर्दयादूतास्ताडयित्वावदंतिच ॥ गच्छपापिन्महाघोरान्नरकानतिभीषणान् ॥ ३२ ॥ यमाज्ञाकारिणोदूताःप्रचंडचंडकादयः ॥ एकपाशेनतान्बध्वानयंति नरकान्प्रति ॥ ३३ ॥ तत्रवृक्षोमहानेकोज्वलदग्निसमप्रभः ॥ पंचयोजनविस्तीर्णएकयोजनमुच्छ्रितः ॥ ३४ ॥ तद्वृक्षेशृंखलैर्बद्ध्वाधोमुखंताडयंतिते ॥ रुदंतिज्वलितास्तत्रतेषांत्रातानविद्यते ॥ ३५ ॥ तस्मिन्वैशाल्मलीवृक्षेलंबंतेऽनेकपापिनः ॥ क्षुत्पिपासापरिश्रांतायमदूतैश्चताडिताः ॥ ३६ ॥ ॥ ॥ ॥

लेजाते हैं ॥ ३३ ॥ तहां एक बड़ा प्रज्वलित अग्निजैसा वृक्ष हैं. पांच योजन चौड़ा है; एकयोजन ऊंचा है ॥ ३४ ॥ उस वृक्षपर शृंखलोंसे बांध, नीचे मुख कर, वे दूत मारते हैं. तहां वृक्षकी अग्निसे जलतेहुये रोते हैं. उनको रक्षक कोई नहीं विद्यमान है ॥ ३५ ॥ उस शाल्मली वृक्षपर अनेक पापी लटकते हैं. कैसे पापी हैं ? क्षुधा प्याससे व्याकुल, यमदूतोंसें ताड़ित भये ॥ ३६ ॥ ॥ ॥

निराधार हुवे वे पापी मेरा अपराध क्षमा करो ऐसे हाथ जोड़, उन दूतोंके प्रति प्रार्थना करते हैं ॥ ३७ ॥ वारंवार यमदूतोंसे लोहेकी लकड़ियोंसे ताड़ित होते हैं और मुद्गर, तोमर, भल्ला, गदा, मुसल इन्होंसेभी ताड़ित होते हैं ॥ ३८ ॥ मार पड़नेसे चेष्टारहितहुवे वे पापी मूर्छाको प्राप्त होते हैं ॥ ३९ ॥ ऐसे चेष्टारहितहुवे उन पापियोंको देख, वे दूत कहते हैं ॥ ३९ ॥ हे पापियो! हे दुराचारियो! पहले किस वास्ते दुष्टकर्म किया? सुगम अन्नदान, जलदान, वस्त्रदान, क्यों नहीं दिये? ॥ ४० ॥ आधाग्रासमात्रभी कभी कुत्ते वा काकको बलि नहीं दिया,

क्षमध्वंभोपराधंमेकृतांजलिपुटाइति ॥ विज्ञापयंतितान्दूतान्पापिष्ठास्तेनिराश्रयाः ॥ ३७ ॥ पुनःपुनश्चतेदूतैर्हन्यंतेलोहयष्टिभिः ॥ मुद्गरैस्तोमरैःकुंतैर्गदाभिर्मुसलैर्भृशम् ॥ ३८ ॥ ताडनाच्चैवनिश्चेष्टामूर्च्छिताश्चभवंतिते ॥ तथानिश्चेष्टितान्दृष्ट्वाकिंकरास्तेवदंतिहि ॥ ३९ ॥ भोभोपापादुराचाराःकिमर्थंदुष्टचेष्टितम् ॥ सुलभानिनदत्तानिजलान्यन्यान्यपिकचित् ॥ ४० ॥ ग्रासार्धमपिनोदत्तंनश्ववायसयोर्बलिम् ॥ नमस्कृतानातिथयोनकृतंपितृतर्पणम् ॥ ४१ ॥ यमस्यचित्रगुप्तस्यनकृतंध्यानमुत्तमम् ॥ नजप्तश्चतयोर्मंत्रोनभवेद्येनयातना ॥ ४२ ॥ नापिकिंचित्कृतंतीर्थंपूजितानैवदेवताः ॥ गृहाश्रमस्थितेनापिहंतकारोऽपिनोधृतः ॥ ४३ ॥ ॥

अभ्यागतको श्रद्धामुजब देकर, नमस्कार नहीं किया, पितृश्वरोंके लिये तर्पणभी नहीं किया ॥ ४१ ॥ अरे मूर्खो! यमराज और चित्रगुप्तका कभी ध्यानभी नहीं किया. उनको मंत्रभी नहीं जपा कि– जिस्से यमकी यातना नहीं होती ॥ ४२ ॥ कोई तीर्थभी नहीं किया और देवपूजा नहीं करी, गृहस्थाश्रम[illegible]में रहकर, पितरोंको हंतकार नहीं निकाला ॥ ४३ ॥ ॥ ॥ ॥

माहात्माकी शुश्रूषाभी नहीं करी. सो अब अपने पापका फल भोगो. तुम पापी हो तुमने धर्म नहीं किया है, तिस्से तुमको मारना शुभ है ॥ ४४ ॥ और अपराधक्षमाको भगवान् हरि ईश्वर करते हैं तुमतो अपराधवालेको उनकी आज्ञासे दंड देते हैं ॥ ४५ ॥ ऐसे कहकर, निर्दयी वे दूत उनको ताड़ना देते हैं. उस मारके पड़नेसे नीचे बलता कोलसा जैसा दीखते हुये पड़ते हैं ॥ ४६ ॥ पड़नेसे शाल्मलीके पत्रोंसे शरीर छिन्नभिन्न होता है, उनको नीचे पड़े देखकर, कुत्ते खाते हैं और वह पापी रोते हैं ॥ ४७ ॥ वे दूत रोतेहुये पापियोंका मुख धूरसे भर, ना-

शुश्रूषिताश्चन संतोभुंक्ष्वपापफलंस्वकम् ॥ यतस्त्वंधर्महीनोऽसिततःसंताड्यतेशुभम् ॥ ४४ ॥ क्षमापराधंकुरुतेभगवान्हरिरीश्वरः ॥ वयंतुसापराधानांदंडदाहितदाज्ञया ॥ ४५ ॥ एवमुक्त्वाचतेदूतानिर्दयंताडयंतितान् ॥ ज्वलदंगारसदृशाःपतितास्ताडनादधः ॥ ४६ ॥ पतनात्तस्यपत्रैश्चगात्रच्छेदोभवेत्ततः ॥ तानधःपतितान्श्वानोभक्षयंतिरुदंतिते ॥ ४७ ॥ रुदंतस्तेततः दूतैर्मुखमापूर्यरेणुभिः ॥ निबध्यविविधैःपाशैर्हन्यंतेकेऽपिमुद्गरैः ॥ ४८ ॥ पापिनःकेऽपिभिद्यंतेक्रकचैःकाष्ठवद्द्विधा ॥ क्षिप्त्वाचान्येधरापृष्ठेकुठारैःखंडशःकृताः ॥ ४९ ॥ अर्धंखात्वावटेके[illegible]तमूर्ध्निसायकैः ॥ अपरेयंत्रमध्यस्थाःपीड्यंतेचेक्षुदंडवत् ॥ ५० ॥

नाप्रकारके पाशोंसे बांधकर, कितनिकको मुद्गरोंसे मारते हैं ॥ ४८ ॥ कितेक आरासे काष्ठजैसे दो भागसे भेदन होते हैं, कितेक पृथ्वीपर डालकर, कुठारोंसे टुकड़ा होते हैं, ॥ ४९ ॥ कितेकको आधा खड्डेमें गाड़, माथेमें बाणोंसे भेदन करते हैं, कितेक यंत्रमें डालेहुए जैसे ऊषके दंडको पेरते हैं तैसे पेरेजाते हैं ॥ ५० ॥

कितेक जलरहे अंगारोंसहितमें लकड़ियोंमें डालकर, चारोंतरफ लकड़ियोंमें अंगार लगाके, लोहपिंडके जैसे धमते हैं ॥ ५१ ॥ कोई घृतके कटाहमें पकायेतते हैं कोई तेलके कटाहमें पकायेते हैं ॥ ५२ ॥ कोई मतवाले हाथियोंके अगाड़ी डालजाते हैं, कोई हाथ पैर बांधिकै नीचे मुख कर दियेजाते हैं ॥ ५३ ॥ कोई कूपोंमें डालेजाते हैं, कोई पर्वतसे पटकजाते हैं, कीड़ोंके कुंडमें डूबेहुये दूसरे कोई कीड़ोंसे खायेजाते

केचित्प्रज्वलमानैस्तुसांगारैःपरितोभृशम् ॥ उल्मुकैर्वेष्टयित्वाचध्मायंतेलोहपिंडवत् ॥ ५१ ॥ केचिद्घृतमयेपाकेतैलपाकेतथापरे ॥
कटाहक्षिप्तवटवत्प्रक्षिप्यंतेयतस्ततः ॥ ५२ ॥ केचिन्मत्तगजेंद्राणांक्षिप्यंतेपुरतःपथि ॥ बद्धाहस्तौचपादौचक्रियंतेकेऽप्यधोमुखाः
॥ ५३ ॥ क्षिप्यंतेकेपिकूपेषुपात्यंतेकेपिपर्वतात् ॥ निमग्नाःकृमिकुंडेषुतुद्यंतेकृमिभिःपरे ॥ ५४ ॥ वज्रतुंडैर्महाकाकैर्गृध्रैरामिषगृध्नुभिः ॥
निष्कुष्यंतेशिरोदेशेनेत्रेवास्येचचंचुभिः ॥ ५५ ॥ नृणंवैप्रार्थयंत्यन्येदेहिदेहिधनंमम ॥ यमलोकेमयादृष्टोधनंमेभक्षितंत्वया ॥ ५६ ॥
एवंविवदमानानांपापिनांनरकालये ॥ छित्त्वासंदंशकैर्दूतामांसखंडान्ददंतिच ॥ ५७ ॥ ॥ ॥

हैं ॥ ५४ ॥ वज्रजैसे तुंड अर्थात् चोंचवाले काकोंसे और मांस खानेवाले गीधोंसे कितेक पापियोंके माथा, नेत्र, मुख चोंचोंसे उखाड़े जाते है ॥ ५५ ॥ हमारा धन देदे २ ऐसे दूसरे मनुष्यसे कहते हैं. और कहते हैं हमारा धन पूर्वजन्ममें खायगया. आज तुझको यमलोकमें मैनें देखा है ॥ ५६ ॥ ऐसे विवाद कररहे पापियोंको नरकस्थानमें दूत छूरावोंसे मांस काटकाटकर, मांसके टुकड़े, मांगनेवालोंको देते हैं ॥ ५७ ॥

यमदूत ऐसे उन पापियोंको ता[illegible]दकर, यमराजकी आज्ञासे पाशोंसें खींचकर, तामिश्रआदि घोर नरकोंमें ड[illegible]ते हैं ॥ ५८ ॥ उस शाल्मली वृक्षके समीप बहोत दुःखवा[illegible] नरक हैं. उन न[illegible]कोंमें महान्दु[illegible]ख है. वोह दुःख वाणीसेभी नहीं कह्या जाता ॥ ५९ ॥ हे गरुड़ ! चौरासी लक्ष ८४००००० नरक हैं. उन्होंमें अत्यंत घोरसे घोर इक्कीस २१ नरक हैं ॥ ६० ॥ तामिश्र, लोहशंकु, महारौरव, शाल्मली, रौरव, कुड्मल, कालसूत्रक, पूतिमृत्ति-

एवंसंताड्यतान्दूताःसंकृष्ययमशासनात् ॥ तामिस्रादिषुघोरेषुक्षिप्यंतेनरकेषुच ॥ ५८ ॥ नरकादुःखबहुलास्तत्रवृक्षसमीपतः ॥ तेष्वस्तियन्महद्दुःखंतद्वाचामप्यगोचरम् ॥ ५९ ॥ चतुराशीतिलक्षाणिनरकाःसंतिखेचर ॥ तेषांमध्येघोरतमाधौरेयास्त्वेकविंशतिः ॥ ६० ॥ तामिस्रोलोहशंकुश्चमहारौरवशाल्मली ॥ रौरवःकुड्मलःकालसूत्रकःपूतिमृत्तिकः ॥ ६१ ॥ संघातोलोहितोदश्चसविषःसंप्रतापनः ॥ महानिरयकाकोलौसंजीवनमहापथौ ॥ ६२ ॥ अवीचिरंधतामिस्रःकुंभीपाकस्तथैवच ॥ संप्रतापननामैकस्तपनस्त्वेकविंशतिः ॥ ६३ ॥ नानापीडामयाःसर्वेनानाभेदैःप्रकल्पिताः ॥ नानापापविपाकाश्चकिंकरौघैरधिष्ठिताः ॥ ६४ ॥ एतेषुपतितामूढाःपापिष्ठाधर्मवर्जिताः ॥ तत्रभुंजंतिकल्पांतेतास्तानरकयातनाः ॥ ६५ ॥ ॥ ॥

क, ॥ ६१ ॥ संघात, लोहितोद, सविष, संप्रतापन, महानिरय, काकोल, संजीवन, महापथ, ॥ ६२ ॥ अवीचि, अंधतामिस्र, कुंभीपाक, संप्रतापन, तपन ॥ ६३ ॥ ए सब इक्कीस नरक नानाप्रकारकी पीड़ामय भई हैं; इन्होंमें जुदी जुदी पीड़ा कल्पित कीगई हैं. नानाप्रकारके पापोंका फल है. दूतोंके समूह ऊपर खड़े हैं ॥ ६४ ॥ इन्होंमें पड़े मूर्ख पापिष्ठ धर्म नहीं करनेवाले तहां कल्पतक वो वो नरक यातना भोगते हैं ॥ ६५ ॥ ॥

जो तामिस्र, अंधतामिस्र, रौरवादिक, यातना हैं उनको स्त्री वा पुरुष, परस्पर संगसे पाप करनेवाले, भोगते हैं ॥ ६६ ॥ ऐसेही कुटुंब वा फक्त अपना पेट भरनेवाला पुरुष यहां दोनों कुटुम्ब वा देहका त्यागकर, मर, उसका ऐसा फल भोगता है ॥ ६७ ॥ अपने खास इस शरीरको त्यागकर, एकही रस्तेमें जाता है. कैसा शरीर? कि— जिसको पाप भोगनेवाले पुरुष भूत (प्राणियों) के द्रोहमें पालते हैं ॥६८॥ उस कुटुंबपालन करनेवालेको नरकमेंही प्राप्तहुवा पाप प्रारब्धयोगसे वो भोगता है. जैसा गृहस्थका धन गया हो वोह दुःखी रहै तैसे दुःखी रहता हे

यास्तामिस्रांधतामिस्रारौरवाद्याश्चयातनाः ॥ भुंक्तेनरोवानारीवामिथःसंगेननिर्मिताः ॥ ६६ ॥ एवंकुटुंबंबिभ्राणउदरंभरएववा ॥ विसृज्येहोभयंप्रेत्यभुंक्तेतत्फलमीदृशम् ॥ ६७ ॥ एकःप्रपद्यतेध्वांतंहित्वेदंस्वंकलेवरम् ॥ कुशलेतरपाथेयोभूतद्रोहेणयद्भृतम् ॥ ६८ ॥ दैवेनासादितंतस्यशमलेनिरयेपुमान् ॥ भुंक्तेकुटुंबपोषस्यहृतद्रव्यइवातुरः ॥ ६९ ॥ केवलेनह्यधर्मेणकुटुंबभरणोत्सुकः ॥ यातिजीवोंऽधतामिस्रंचरमंतमसःपदम् ॥ ७० ॥ अधस्तान्नरलोकस्ययावतीर्यातनादयः ॥ क्रमशःसमनुक्रम्यपुनरत्राव्रजेच्छुचिः ॥ ७१ ॥ इतिश्रीगरुडपुराणेसारोद्धारेयमयातनानिरूपणंनामतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥

॥ ६९ ॥ ऐसे केवल पापसेही कुटुंब पालनेमें उत्साहवान् जीव सबसे महान्दुःखवाले अंधतामिस्र नामक नरकमें पड़ता है ॥ ७० ॥ मनुष्यलोकके नीचे जितनी नरकयातना हैं. क्रमसे सबको भोगकर, पीछे शुद्ध होकर, यहां आता है ॥ ७१ ॥ इति श्रीगरुडपुराणसारोद्धारस्य ज्ञानबोधिनीभाषाटीकायां यमयातनानिरूपणं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ॥

गरुड़जी पूछते हैं– हे केशव! यमके मार्गमें पुरुष कौन पापोंसे जाते हैं? तथा वैतरणीमें कौन [illegible] पड़ते हैं? कौनसे पापोंसे [illegible]तरणीमें और नरकोंमें पड़ते हैं? स[illegible] १ ॥ श्रीभगवान कहते हैं– सदा जो कुकर्ममें आसक्त हैं, शुभ [illegible]से विमुख हैं वे नरकोंसे नरकोंमें जाते हैं, दुःखोंमे दुःख भोगते हैं, भ[illegible]से भय प्राप्त होते हैं ॥ २ ॥ धर्मराजके पुरमें धर्मात्मा तीन द्वारोंसे जाते हैं. और पापीतौ केवल द-क्षिणद्वारसे ही जाते हैं ॥ ३ ॥ इस दक्षिणमार्गमेंही महादुःख है तथा वैतरणी नदी है. तिसमें जो पापी जाते हैं उन्होंकी हकीकत तुमसे हम

॥ गरुडउवाच ॥ ॥ कैर्गच्छंतिमहामार्गेवैतरण्यांपतंतिकैः ॥ कैःपापैर्नरकेयांतितन्मेकथयकेशव ॥ १ ॥ श्रीभगवानुवाच ॥ ॥ सदैवाकर्मनिरताःशुभकर्मपराङ्मुखाः ॥ नरकान्नरकंयांतिदुःखाद्दुःखंभयाद्भयम् ॥ २ ॥ धर्मराजपुरेयांतित्रिभिर्द्वारैस्तुधार्मिकाः ॥ पापास्तुदक्षिणद्वारमार्गेणैवव्रजंतितम् ॥ ३ ॥ अस्मिन्नेवमहादुःखेमार्गेवैतरणीनदी ॥ तत्रयेपापिनोयांतितानहंकथयामिते ॥ ४ ॥ ब्रह्मघ्नाश्चसुरापाश्चगोघ्नावाबालघातकाः ॥ स्त्रीघातीगर्भपातीचयेचप्रच्छन्नपापिनः ॥ ५ ॥ येहरंतिगुरोर्द्रव्यंदेवद्रव्यंद्विजस्यवा ॥ स्त्रीद्रव्यहारिणोयेचबालद्रव्यहराश्चये ॥ ६ ॥ येऋणंनप्रयच्छंतियेवैन्यासापहारकाः ॥ विश्वासघातकायेचसविषान्नेनमारकाः ॥ ७ ॥

कहते हैं ॥ ४ ॥ ब्रह्महत्यावाले, मदिरा पीनेवाले, गौ मारनेवाले, बालघाती, स्त्रीघाती, गर्भपाती और गुप्त पाप करनेवाले ॥ ५ ॥ गुरुद्रव्य चोरनेवाले, देवद्रव्य, ब्राह्मणद्रव्य चोरनेवाले, स्त्रीद्रव्य चोरनेवाले, बाल द्रव्य चोरानेवाले ॥ ६ ॥ ऋण नहीं देनेवाले, विश्वाससे स्थापित व-स्तुको नहीं देनेवाले, विश्वासघाती, अन्नमें जहर डालकर, मारनेवाले ॥ ७ ॥ ॥ ॥ ॥

दूसरेका दोष ग्रहण करनेवाले, गुण छिपानेवाले, गुणवानोंमें मत्सरता रखनेवाले, नीचोंसे स्नेह करनेवाले, मूर्ख सत्संगतिसे विमुख ॥ ८ ॥ और तीर्थ, सज्जन, सत्कर्म, गुरु, देव, इन्होंकी निंदा करनेवाले, पुराण, वेद, मीमांसा, न्याय, वेदांत, इन्होंमें दूषण काढ़नेवाले, ॥ ९ ॥ दुःखीको देख, हर्ष करनेवाले, सुखीको देख, दुःख देनेवाले, कुबचन बोलनेवाले, दुष्टचित्तवाले, ॥ १० ॥ हितका वचन शुनते नहीं, शास्त्रवार्ताको

तत्रसूर्यंनमस्कृत्यपरिक्रम्यचितांतदा ॥ पुष्पशय्यांतदारोहेन्निजांकेस्थापयेत्पतिम् ॥ ३९ ॥ सखिभ्यःश्रीफलंदद्याद्दाहमाज्ञापयेत्ततः ॥ गंगास्नानसमंज्ञात्वाशरीरंपरिदाहयेत् ॥ ४० ॥ नदहेद्गर्भिणीनारीशरीरंपतिनासह ॥ जनयित्वाप्रसूतिंचबालंपोष्यसतीभवेत् ॥ ४१ ॥ नारीभर्तारमासाद्यशरीरंदहतेयदि ॥ अग्निर्दहतिगात्राणिनैवात्मानंप्रपीडयेत् ॥ ४२ ॥ दह्यतेध्मायमानानांधातूनांच यथामलः ॥ तथानारीदहेत्पापंहुताशेह्यमृतोपमे ॥ ४३ ॥ दिव्यादौसत्ययुक्तश्चशुद्धोधर्मयुतोनरः ॥ यथानदह्यतेतप्तलोहपिंडेनकर्हिचित ॥ ४४ ॥ तथासापतिसंयुक्तादह्यतेनकदाचन ॥ अंतरात्मात्मनाभर्तामृतेनैकत्वमागता ॥ ४५ ॥ ॥ ॥

पाप दग्ध करतीहै ॥ ४३ ॥ विवाद शपथादिकोंमें जैसे सत्यवक्ता शुद्ध धर्मात्मा मनुष्य तपेहुवे लोहाके पिंडसे कभी नहीं दग्ध होताहै ॥ ४४ ॥ तैसे वह भी पतिसंयुक्त कभी दग्ध नहीं होतीहै. अंतरात्माकरके मराहुवा भर्तारके एकत्र स्वरूप प्राप्त होती है अर्थात् फेर नारीशरीर नहीं प्राप्त होती है ॥ ४५ ॥ ॥ ॥ ॥ ॥

जहांतक स्त्री मरेहुवे पतिसंग अपने शरीरको दग्ध नहीं करती है तहांतक वह स्त्री स्त्रीशरीरसे नहीं छूटती है ॥ ४६ ॥ तिसीसे संपूर्ण यत्नसे अपने पतिकी सदा सेवा करना. कर्मोंसे, मनसे, वाणीसे मरेहुवे वा जीवते पतिकी आज्ञानुसार होना ॥ ४७ ॥ पतिके मरेबाद जो स्त्री अग्निमें प्रवेश करै वह इंद्राणीके तुल्य हुई स्वर्गमें प्रकाशतीहै ॥ ४८ ॥ वह स्वर्गमें पतिके प्रियहुई अप्सरोंके समूहसे स्तुतिको

यावच्चाग्नौमृतेपत्यौस्त्रीनात्मानंप्रदाहयेत् ॥ तावन्नमुच्यतेसाहिस्त्रीशरीरात्कथंचन ॥ ४६ ॥ तस्मात्सर्वप्रयत्नेनस्वपतिंसेवयेत्सदा ॥ कर्मणामनसावाचामृतेजीवतितद्व्रता ॥ ४७ ॥ मृतेभर्तरियानारीसमारोहेद्धुताशनम् ॥ साऽरुंधतीसमाभूत्वास्वर्गलोकेमहीयते ॥ ४८ ॥ तत्रसाभर्तृपरमास्तूयमानाप्सरोगणैः ॥ रमतेपतिनासार्धंयावदिंद्राश्चतुर्दश ॥ ४९ ॥ मातृकंपैतृकंचैवयत्रसाचप्रदीयते ॥ कुलत्रयंपुनात्यत्रभर्तारंयानुगच्छति ॥ ५० ॥ तिस्रःकोट्योऽर्धकोटीचयानिरोमाणिमानुषे ॥ तावत्कालंवसेत्स्वर्गेपतिनासहमोदते ॥ ५१ ॥ ॥ ॥ ॥

प्राप्त हुई पतिके संग जहांतक चौदह इंद्र हों जहांतक रमतीहै ॥ ४९ ॥ माताके कुलका, पिताके कुलका, ऐसे तीन कुलोंको पवित्र करतीहै जो स्त्री पतिके संग जलती है ॥ ५० ॥ मनुष्यशरीरमें साढ़ेतीन करोड़ रोम हैं. उतनेहीं वर्षपर्यंत स्वर्गलोकमें वास करतीहै. पतिके संग आनंद भोगती है ॥ ५१ ॥ ॥ ॥ ॥ ॥

॥ ५२ ॥ सूर्यजैसे प्रकाशमान विमानमें अपने प्यारेके संग रमतीहै. जहांतक सूर्य चंद्रमा रहें तहांतक पतिके लोकमें वास करतीहै ॥ ५२ ॥
फेर चिरायु होकर, निर्मल कुलमें जन्मतीहै. जो स्त्री पतिव्रता हो सो उसी पतिको प्राप्त होतीहै ॥ ५३ ॥ जो स्त्री क्षणमात्र दाह होनेके
दुःखसे ऐसे सुखको त्यागतीहै वह मूर्खिणी जन्मपर्यंत विरहकी अग्निसे दग्ध होतीहै ॥ ५४ ॥ तिसीसे पतिको शिवरूप जानके, उसके

विमानेसूर्यसंकाशेक्रीडतेरमणेनसा ॥ यावदादित्यचंद्रौचभर्तृलोकेचिरंवसेत् ॥ ५२ ॥ पुनश्चिरायुःसाभूत्वाजायतेविमले
कुले ॥ पतिव्रतातुयानारीतमेवलभतेपतिम् ॥ ५३ ॥ याक्षणंदाहदुःखेनसुखमेतादृशंत्यजेत् ॥ सामूढाजन्मपर्यंतंदह्यतेविर
हाग्निना ॥ ५४ ॥ तस्मात्पतिंशिवंज्ञात्वासहतेनदहेत्तनुम् ॥ यदिनस्यात्सतीतार्क्ष्यतमेवंप्रदहेत्तदा ॥ ५५ ॥ अर्धेदग्धेऽथ
वापूर्णेस्फोटयेत्तस्यमस्तकम् ॥ गृहस्थानांतुकाष्ठेनयतीनांश्रीफलेनच ॥ ५६ ॥ प्राप्तयेपितृलोकानांभित्त्वातद्ब्रह्मरंध्रकम् ॥
आज्याहुतिंततोदद्यान्मंत्रेणानेनतत्सुतः ॥ ५७ ॥ ॥ ॥ ॥ ॥

संग शरीर दग्ध करना. हे गरुड़! सती हो तो तिसको इसप्रकार दग्ध करना ॥ ५५ ॥ आधा दग्ध हुवा वा पूरा दग्ध हुवा उसका मस्तक
फोड़ना सो मस्तक गृहस्थोंको तो काष्ठसे और यतियोंको श्रीफलसे फोड़ना ॥ ५६ ॥ पितृलोककी प्राप्तिके लिये उसका ब्रह्मरंध्र भेदनकर, ॥५२॥
उसमें घृतकी पुत्र आहुति देवै इस मंत्रसे ॥ ५७ ॥ ॥ ॥ ॥ ॥

हे पावक! तुम श्रीभगवानसे प्रगटेहो सो तुम्हारे सकाशसे यह मनुष्य स्वर्गलोकमें जावै ॥ ५८ ॥ ऐसे तिलोंसे मिली मंत्रसहित घृतकी आहुति देकर, गाढ़ रोदन करना. उससे प्राणीके सुख होताहै ॥ ५९ ॥ दाहक्रियाके अगाड़ी स्त्रियोंने स्नान करना, पुत्रोंकरके नाम गोत्रको लेकर, तिलोदक देना ॥ ६० ॥ नीमके पत्ता भक्षण करना, मरेहुवेके गुण कहने, स्त्रियोंको अगाड़ी कर, पीछे मनुष्यसमूह

अस्मात्त्वमधिजातोऽसित्वदयंजायतांपुनः ॥ असौस्वर्गायलोकायस्वाहाज्वलतुपावकः ॥ ५८ ॥ एवमाज्याहुतिंदत्वातिलमिश्रांसमंत्रकाम् ॥ रोदितव्यंततोगाढंतेनतस्य सुखंभवेत् ॥ ५९ ॥ दाहादनंतरंकार्यंस्त्रीभिःस्नानंततःसुतैः ॥ तिलोदकंततोदद्यान्नामगोत्रेणकल्पितम् ॥ ६० ॥ प्राशयेन्निंबपत्राणिमृतकस्यगुणान्वदेत् ॥ स्त्री नाऽग्रेगृहंगच्छेत्पृष्ठतोनरसंचयः ॥ ६१ ॥ गृहेस्नानंपुनःकृत्वागोग्रासंचप्रदापयेत् ॥ पत्रावल्यांचभुंजीयाद्गृहान्नंनैवभक्षयेत् ॥ ६२ ॥ मृतकस्थानमालिप्यदक्षिणाभिमुखंततः ॥ द्वादशाहकपर्यंतंदीपंकुर्यादहर्निशम् ॥ ६३ ॥ सूर्येऽस्तमागतेतार्क्ष्यस्मशानेवाचतुष्पथे ॥ दुग्धंचमृन्मयेपात्रेतोयंदद्याद्दिनत्रयम् ॥ ६४ ॥ ॥ ॥ ॥ ॥

होकर, घरमें जाना ॥ ६१ ॥ फेर घरमें स्नान करके, गोग्रास देना, पत्रावलीमें भोजन करना, घरका अन्न नहीं खाना ॥ ६२ ॥ मृतकका स्थान लीपके, दक्षिणको मुख कर, बारा दिनपर्यंत रातदिन दीपक करना ॥ ६३ ॥ हे गरुड़! सूर्य अस्तहुवे पर स्मशानमें वा चौरस्तामें, मृत्तिकामय पात्रमें तीन दिन दूध, जल देना ॥ ६४ ॥ ॥ ॥ ॥ ॥

कच्ची मृत्तिकाके पात्रमें दूध, घी भरकर, जेवड़ीसे बांधे हुये तीन काष्ठ धरकर, ये मंत्र पढ़ना ॥६५॥ स्मशानरूपी अग्निसें दग्ध हो, बांधवोंसे त्यागे भये हो सो यह जल और दूध है. इस जलमें स्नान करो और दूध पीवो ॥ ६६ ॥ चौथेदिन साग्निक और निरग्निकोंकरके अस्थिसंचय करना, तीसरे दिन वा दूसरे दिनभी करना. पंचक शनिवारादिकोंका वर्जना ॥६७॥ स्मशानभूमिमें जाकर, स्नान करके, पवित्र होना. ऊन वस्त्र

अपक्वमृन्मयंपात्रंक्षीरनीरप्रपूरितम् ॥ काष्ठत्रयंगुणैर्बद्धंधृत्वामंत्रंपठेदिमम् ॥ ६५ ॥ श्मशानानलदग्धोऽसिपरित्यक्तोऽसि
बांधवैः ॥ इदंनीरमिदंक्षीरमत्रस्नाहिइदंपिब ॥ ६६ ॥ चतुर्थेसंचयःकार्यःसाग्निकैश्चनिरग्निकैः ॥ तृतीयेऽह्निद्वितीयेवा
कर्तव्यश्चाविरोधतः ॥ ६७ ॥ गत्वाश्मशानभूमिंचस्नानंकृत्वाशुचिर्भवेत् ॥ ऊर्णासूत्रंवेष्टयित्वापवित्रींपरिधायच ॥ ६८ ॥
दद्यात्श्मशानवासिभ्यस्ततोमाषबलिंसुतः ॥ यमायत्वेतिमंत्रेणतिस्रःकुर्यात्परिक्रमाः ॥ ६९ ॥ ततोदुग्धेनसंभ्युक्ष्यचिता
स्थानंखगेश्वर ॥ जलेनसेचयेत्पश्चादुद्धरेदस्थिवृंदकम् ॥ ७० ॥ कृत्वापलाशपत्रेषुक्षालयेद्दुग्धवारिभिः ॥ संस्थाप्यमृ
न्मयेपात्रेश्राद्धंकुर्याद्यथाविधि ॥ ७१ ॥ ॥ ॥ ॥ ॥

पहरकर, पवित्री धारण कर, ॥ ६८ ॥ पुत्र स्मशानवासियोंको उड़दकी बलि देवै "यमायत्वा" इस मंत्रसे तीन परिक्रमा करना ॥ ६९ ॥ हे गरुड़! पीछे दूधसे चितास्थान प्रोक्षणकर, जलसे फेर छिड़कना. पीछे हाड़ोंका समूह ग्रहण करना ॥ ७० ॥ उन हाड़ोंको पलाशके पत्तोंमें डाल, दूधजलसे धोने पीछे मृत्तिकाके पात्रमें स्थापित कर, विधिसे श्राद्ध करना ॥ ७१ ॥ ॥ ॥ ॥

त्रिकोण स्थंडिल करके, गोबरसे लीप, दक्षिणको मुख कर, तीनों दिशावोंमें तीन पिंड देने ॥ ७२ ॥ पीछे चिताकी भस्म इकट्ठी कर, उसपर तिपाई धरके, तिपाईपर जलसे भरा बिगर ढका घट धरना ॥ ७३ ॥ पीछे चांवल रांध कर, दही घृत मिलाकर, प्रेतको जलसहित विधिसे मीठा बलिदेना ॥ ७४ ॥ पीछे पंद्रहपद उत्तरदिशामें जाना. वहां खड्डा खोदकर, हे गरुड़! हड्डीके पात्रको स्थापित करना ॥ ७५ ॥

त्रिकोणंस्थंडिलंकृत्वागोमयेनोपलेपितम् ॥ दक्षिणाभिमुखोदिक्षुदद्यात्पिंडत्रयंत्रिषु ॥ ७२ ॥ पुंजीकृत्यचिताभस्मतत्रधृत्वात्रिपादुकाम् ॥ स्थापयेत्तत्रसजलमनाच्छाद्यमुखंघटम् ॥ ७३ ॥ ततस्तंडुलपाकेनदधिघृतसमन्वितम् ॥ बलिंप्रेतायसजलंदद्यान्मिष्टंयथाविधि ॥ ७४ ॥ पदानिदशपंचैवचोत्तरस्यांदिशिव्रजेत् ॥ गर्तंविधायतत्रास्थिपात्रंसंस्थापयेत्खग ॥ ७५ ॥ तस्योपरिततोदद्यात्पिंडंदाहार्तिनाशनम् ॥ गर्तादुद्धृत्यतत्पात्रंनीत्वागच्छेज्जलाशयम् ॥ ७६ ॥ तत्रप्रक्षालयेद्दुग्धजलादस्थिपुनःपुनः ॥ चर्चयेच्चंदनेनाथकुंकुमेनविशेषतः ॥ ७७ ॥ धृत्वासंपुटकेतानिकृत्वाचहृदिमस्तके ॥ परिक्रम्यनमस्कृत्यगंगामध्येविनिःक्षिपेत् ॥ ७८ ॥ ॥ ॥ ॥ ॥

पीछे उसके ऊपर दाहकी आर्ति नाशकरनेवाला पिंड देना. पीछे खड्डेसे काढ़कर, उस पात्रको जलके सरोवरमें लेजाय ॥ ७६ ॥ तहां दूध, जलसें हाड़ वारंवार धोने. चंदनसे केशरसे चर्चित करने ॥ ७७ ॥ फेर संपुटमें धरके, उन्होंको हृदय और मस्तकपर कर, परिक्रमा दे नमस्कार कर, श्रीगंगाके मध्यमें स्थापित करने ॥ ७८ ॥ ॥ ॥ ॥ ॥

दशदिनके भीतर जिसका हाड गंगाजलमें डालाजाताहै उसको ब्रह्मलोकसे फेर कभी पीछा आना नहीं होताहै ॥ ७९ ॥ जहांतक मनुष्यके हाड़ गंगाजलमें स्थित रहतेहैं उतने हजारवर्ष स्वर्गलोकमें वास करताहै ॥ ८० ॥ गंगाजलकी तरंग स्पर्श करके जो पवन मरेहुवेका स्पर्श करै तौ उसके पाप तत्काल नाश होतेहैं ॥ ८१ ॥ महान तपस्यासे राजा भगीरथ श्रीगंगाको आराधन करके, पितृश्वरोंके उद्धार करनेके वा-

अंतर्दशाहंयस्यास्थिगंगातोयेनिमज्जति ॥ नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कदाचन ॥ ७९ ॥ यावदस्थिमनुष्यस्यगंगातोये षुतिष्ठति ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ ८० ॥ गंगाजलोर्मिसंस्पृश्यमृतकंपवनोयदा ॥ स्पृशतेपातकंतस्य सद्यएवविनश्यति ॥ ८१ ॥ आराध्यतपसोग्रेणगंगांदेवींभगीरथः ॥ उद्धारार्थंपूर्वजानामानयद्ब्रह्मलोकतः ॥ ८२ ॥ त्रिषुलोकेषुविख्यातंगंगायाःपावनंयशः ॥ यापुत्रान्सगरस्यैतान्भस्माख्याननयद्दिवम् ॥ ८३ ॥ पूर्वेवयसिपापानियेकृ त्वामानवामृताः ॥ गंगायामस्थिपतनात्स्वर्गलोकंप्रयांतिते ॥ ८४ ॥ कश्चिद्व्याधोमहारण्येसर्वप्राणिविहिंसकः ॥ सिं हेननिहतोयावत्प्रयातिनरकालये ॥ ८५ ॥ ॥ ॥ ॥ ॥

स्ते ब्रह्मलोकसे लाये ॥ ८२ ॥ सो श्रीगंगाको पवित्र यश त्रिलोकीमें विख्यात है. जो गंगा भस्मभये सगरके पुत्रोंको स्वर्गमें प्राप्त करतीभई ॥ ८३ ॥ पूर्वअवस्थामें पाप करके, जो मरतेहैं वेभी गंगामें हाड़ डालनेसे स्वर्गमें जाते हैं ॥ ८४ ॥ कोई महान वनमें सब प्राणियोंको हिंसक व्याध सिंहसे माराहुवा नरकमें जाताथा ॥ ८५ ॥ ॥ ॥ ॥ ॥

तिसीसमय एक कागनें उसका हाड़ लेकर, गंगामें पटका हाड़के डालनेंसे दिव्य विमानमें बैठकर, वोइ स्वर्गमें जाताभया ॥ ८६ ॥ इसीसे सुपुत्र आपही अपने पिताके अस्थि गंगामें डाले. अस्थिसंचयके अगाड़ी दशगात्र करना ॥ ८७ ॥ इसके आगल कोई विदेशमें वा वनमें अथवा चोरभयसे मरताहै. जिसका शरीर नहीं मिलता तब जिसदिन [illegible]नता है ॥ ८८ ॥ उसीदिन दर्भोंका पुतला करके, पहले कही रीतसे

तावत्कालेनतस्यास्थिगंगायांपातितंतदा ॥ दिव्यंविमानमा[illegible]सगतोदेवमंदिरम् ॥ ८६ ॥ अतःस्वमेवसत्पुत्रोगंगायाम
स्थिपातयेत् ॥ अस्थिसंचयनादूर्ध्वंदशगात्रंसमाचरेत् ॥ ८७ ॥ अथकश्चिद्विदेशेवावनेचौरभयेमृतः ॥ नलब्धस्तस्यदेहश्चे
च्छृणुयाद्यां[illegible]नेतदा ॥ ८८ ॥ दर्भपुत्तलकंकृत्वापूर्ववत्केवलंदहेत् ॥ तस्यभस्मसमादायगंगातोयेविनिःक्षिपेत् ॥ ८९ ॥
दशगात्रादि[illegible]कर्मतद्दिनादेवकारयेत् ॥ सएवदिवसोग्राह्यःश्राद्धेसांवत्सरादिके ॥ ९० ॥ पूर्णेगर्भेमृतांनारीविदार्यजठरंत
दा ॥ बालंनिष्कास्यनिक्षिप्यभूमौतामेवदाहयेत् ॥ ९१ ॥ गंगातीरेमृतंबालंगंगायामेवपातयेत् ॥ अन्यदेशेक्षिपेद्भूमौसप्त
विंशतिमासजम् ॥ ९२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

केवल दग्ध करना और उसकी भस्म लेकर, गंगामें डालना ॥ ८९ ॥ दशगात्रादिक कर्म उसीदिनसे करने वही दिवस श्राद्धमें ग्रहण करना ॥ ९० ॥ जो पूर्ण गर्भहुई स्त्री मरजाय तब उसका पेट चीर, बालक निकाल, पृथ्वीमें गाड़के, उस स्त्रीको दग्ध करना ॥ ९१ ॥ गंगातीरपर मरेहुवे बालकको गंगामें पटकना और देशमें मरेहुवे बालकको सत्तावीस महीनातक पृथ्वीमें डालना ॥ ९२ ॥ ॥ ॥ ॥

इसके आगल उसको दग्ध करना, गंगामें हाड़ डालना. जलको कलश देना. बालकोंको भोजन कराना॥९३॥ गर्भनाश हुवेकी क्रिया नहीं है. मरेहुवे बालकको दूध देना. जलघट और क्षीरभोजन बालकोंको देना ॥ ९४ ॥ पांचवर्षकी अवस्थातक बालक मरे तो बालकोंको भोजन कराने. दशवर्षतक पौगंडअवस्थामें व्रतरहित बालक मराहुवा पौगंड अवस्थाके बालक भोजन कराने ॥ ९५ ॥ पंचम वर्षसे उपरांत व्रतस-

अतःपरंदहेत्तस्यगंगायामस्थिनिक्षिपेत् ॥ जलकुंभश्चदातव्यंबालानामेवभोजनम् ॥ ९३ ॥ गर्भेनष्टेक्रियानास्तिदुग्धंदेयं मृतेशिशौ ॥ घटंचपायसंभोज्यंदद्याद्बालविपत्तिषु ॥ ९४ ॥ कुमारेचमृतेबालान्कुमारानेवभोजयेत् ॥ सबालान्भोजयेद्द्वि प्रान्पौगंडेसव्रतेमृते ॥ ९५ ॥ मृतश्चपंचमादूर्ध्वमव्रतःसव्रतोऽपिवा ॥ पायसेनगुडेनापिपिंडान्दद्याद्दशक्रमात् ॥ ९६ ॥ एकादशंद्वादशंचवृषोत्सर्गविधिंविना ॥ महादानविहीनंचपौगंडेकृत्यमाचरेत् ॥ ९७ ॥ जीवमानेचपितरिनपौगंडेसपिंड नम् ॥ अतस्तस्यद्वादशाहन्येकोद्दिष्टंसमाचरेत् ॥ ९८ ॥ स्त्रीशूद्राणांविवाहस्तुव्रतस्थानेप्रकीर्तितः ॥ व्रतात्प्राक्सर्ववर्णानां वयस्तुल्याक्रियाभवेत् ॥ ९९ ॥ ॥ ॥ ॥ ॥ ॥

हित वा व्रतरहित मरेहुवेको पायसगुड़से क्रमसे दशपिंड देने॥ ९६ ॥ एकादशा, द्वादशा, वृषोत्सर्ग और महादान विना पौगंड अवस्थामें कृत्य करना ॥ ९७ ॥ पिता जीवता हुवा पौगंड अवस्थामें सपिंडीकर्म नहीं करना इसीसे उसके बारवेंदिवस एकोद्दिष्टश्राद्ध करना ॥ ९८ ॥ स्त्री और शूद्रोंके व्रतस्थानमें विवाह कहाहै. व्रतके पहिले सब वर्णोंके अवस्थातुल्य क्रिया करनी ॥ ९९ ॥ ॥ ॥ ॥

थोड़े कर्मोंके प्रसंगसे थोड़े विषयोंके बंधनमें थोड़ी अवस्थामें थोड़ीही क्रिया कहीहै ॥ १०० ॥ किशोर और तरुण अवस्थामें शय्यादान वृषयज्ञादिक करनी. पददान महादान गोदान भी देने ॥ १ ॥ सब यतियोंको दाह करना और जलक्रिया नहीं कहीहै उन्होंका दशगात्रादिकभी पुत्रोंने नहीं कराना ॥२॥ दंड ग्रहण करनेसे मनुष्य नारायणस्वरूप होता है सो तीन दंडोंके ग्रहण करनेसे उन्होको प्रेतपना नहीं हो-

स्वल्पात्कर्मप्रसंगाच्चस्वल्पाद्विषयबंधनात् ॥ स्वल्पेवयसिदेहेचक्रियास्वल्पामपीच्छति ॥ १०० ॥ किशोरेतरुणेकुर्याच्छय्या वृषमखादिकम् ॥ पददानंमहादानंगोदानमपिदापयेत् ॥ १ ॥ यतीनांचैवसर्वेषांनदाहोनोदकक्रिया ॥ दशगात्रादिकंतेषांनकर्तव्यंसुतादिभिः ॥ २ ॥ दंडग्रहणमात्रेणनरोनारायणोभवेत् ॥ त्रिदंडग्रहणात्तेषांप्रेतत्वंनैवजायते ॥ ३ ॥ ज्ञानिनस्तुसदामुक्ताःस्वरूपानुभवेनहि ॥ अतस्तेतुप्रदत्तानांपिंडानांनैवकांक्षिणः ॥ ४ ॥ तस्मात्पिंडादिकंतेषांतन्नोदकमाचरेत् ॥ तीर्थश्राद्धंगयाश्राद्धंपितृभक्त्यासमाचरेत् ॥ ५ ॥ हंसंपरमहंसंचकुटीचकबहूदकौ ॥ एतान्संन्यासिनस्तार्क्ष्यपृथिव्यां स्थापयेन्मृतान् ॥ ६ ॥ ॥ ॥ ॥ ॥

ताहै ॥ ३ ॥ ज्ञानी स्वरूपके अनुभवसे सदामुक्त रहतेहैं इसीसे वे ज्ञानी दिये भये पिंडोंको नही वांछा करतेहैं ॥ ४ ॥ तिसीसे उन्होंको पिंडादिक नहीं कहाहै, जलांजलि नहीं कहीहै, तीर्थश्राद्ध, गयाश्राद्ध, पितृभक्तिसे आचरण करना, ॥ ५ ॥ हंस, परमहंस, कुटीचक, बहूदक ए कहे संन्यासियोंको हे गरुड़! मरनेसे पृथ्वीमें स्थापित करने ॥ ६ ॥ ॥ ॥ ॥ ॥

गंगादि महानदियोंके अभावमें पृथ्वीमें गाड़ना कहाहै जब महानदी हो तब उन्होंमें डालै ॥ १०७ ॥ इति श्रीसारोद्धारे गरुडपुराणे ज्ञानबोधनीभाषाटीकायां दाहास्थिसंचयनिरूपणो नाम दशमोऽध्यायः ॥ १० ॥ अब गरुड़जी कहतेहैं— हे केशव! दशगात्रोंकी विधि कहो. दशगात्र करनेसे क्या सुकृत होता है? पुत्र नहीं हुवा तौ कौन करै? ए हमारेको कहो ॥ १ ॥ अब भगवान कहते हैं— हे गरुड़!

गंगादीनामभावेहिपृथिव्यांस्थापनंस्मृतम् ॥ यत्रसंतिमहानद्यस्तदातास्वेवनिःक्षिपेत् ॥ १०७ ॥ इतिश्रीगरुडपुराणेदाहास्थिसंचयकर्मनिरूपणोनामदशमोऽध्यायः ॥ १० ॥ ॥ गरुडउवाच ॥ ॥ दशगात्रविधिंब्रूहिकृतेकिंसुकृतंभवेत् ॥ पुत्राभावेतुकःकुर्यादितिमेवदकेशव ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणुतार्क्ष्यप्रवक्ष्यामिदशगात्रविधिंतव ॥ यद्विधायचसत्पुत्रोमुच्यतेपैतृकादृणात् ॥ २ ॥ पुत्रःशोकंपरित्यज्यधृतिमास्थायसात्विकीम् ॥ पितुःपिंडादिकंकुर्यादश्रुपातंनकारयेत् ॥ ३ ॥ श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोऽवशः ॥ अतोनरोदितव्यंहितदाशोकान्निरर्थकात् ॥ ४ ॥ ॥ ॥ ॥

सुनो तुम्हारेको दशगात्रोंकी विधि कहताहूं जिनको करके, श्रेष्ठ पुत्र पितृऋणसे छूटता है ॥ २ ॥ पुत्र शोकको त्यागके, सात्विकी धीरजता धर, पिताके, पिंडादिक करने और अश्रुपात नहीं डालने ॥ ३ ॥ कफ अश्रुपात जो बंधु छोड़ते हैं उसको प्रेत पराधीन हुवा भोगता है इसीसे उस वख्त नहीं रोदन करना कारण शोक निरर्थक है ॥ ४ ॥ ॥ ॥ ॥ ॥

जो ॥नुष्य ९ ... ॥तदिन शोच करै तौभी नाशहुवा कभी नहीं दिखता है ॥ ५ ॥ जन्मेहुएकी निश्चय मृत्यु है. मरेहुएका निश्चय जन्म है तिसीसे विवेकी दूर करनेको अशक्य ऐसे कार्यमें शोक ... करै ॥ ६ ॥ ऐसा कोई दैवी वा मानषी उपाय नहीं है जो मृत्युके वशीभूत हुये जीवको फेर यहां प्राप्त करै ॥ ७ ॥ अवश्यभावी पदार्थोंका जो उपाय होता तौ नल, रामचंद्र, युधिष्ठिर ए दुःखोंसे नहीं युक्त होते

यदिवर्षसहस्राणिशोचतेऽहर्निशंनरः ॥ तथापिनैवनिधनंगतोदृश्येतकर्हिचित् ॥ ५ ॥ जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच ॥ तस्मादपरिहार्येर्थेनशोकंकारयेद्बुधः ॥ ६ ॥ नहिकश्चिदुपायोऽस्तिदैवोवामानुषोपिवा ॥ योहिमृत्युवशंप्राप्तोजंतुःपुनरिहाव्रजेत् ॥७॥ अवश्यंभाविभावानांप्रतीकारोभवेद्यदि ॥ तदादुःखैर्नयुज्येरन्नलरामयुधिष्ठिराः ॥ ८ ॥ नायमत्यंतसंवासःकस्यचित्केनचित्सह ॥ अपिस्वस्यशरीरेणकिमुतान्यैःपृथग्जनैः ॥ ९ ॥ यथाहिपथिकःकश्चिच्छायामाश्रित्यविश्रमेत् ॥ विश्रम्यचपुनर्गच्छेत्तद्वद्भूतसमागमः ॥ १० ॥ यत्प्रातःसंस्कृतंभोज्यंसायंतच्चविनश्यति ॥ तदन्नरससंपुष्टेकायेकानामनित्यता ॥ ११ ॥ ॥ ॥ ॥

॥ ८ ॥ अत्यंत समागम कोईका किसीके संग नहीं है अपने शरीरके संगभी नहीं है तो दूसरे कुटुंबादिकोंसे क्या हो ॥ ९ ॥ जैसे कोई रस्तेमें जानेवाला मार्गमें छाया देखकर, विश्राम लेता है विश्राम लेकर, पीछो जायहै तैसे यह प्राणियोंका संगम है ॥ १० ॥ जो प्रातःकालका बनाया भया अन्न सायंकाल नष्ट होता है उसी रससे पुष्ट ऐसे शरीरमें कौनसी नित्यता है ॥ ११ ॥ ॥ ॥

इस दुःखका औषध विचार है सो जानकर, पुत्र अज्ञानसे प्रगटहुवे शोकको त्यागके, क्रिया करे ॥ १२ ॥ पुत्र नहीं होतो स्त्री करे स्त्री न हो तो छोटाभाई करै वा सोदर करै वा ब्राह्मणके वा शिष्य अथवा सपिंड क्रिया करै ॥ १३ ॥ हे गरुड़! बड़े वा छोटे भाईके पुत्र वा पोतासे पुत्रहीनकी दशगात्रादिक क्रिया करें ॥ १४ ॥ एक पितासे हुये ऐसे भाइयोंमें जो एक पुत्रवाला हो तो वे सब एक भाईके पुत्र कर-

भैषज्यमेतद्दुःखस्यविचारंपरिचिंत्यच ॥ अज्ञानप्रभवंशोकंत्यक्त्वाकुर्यात्क्रियांसुतः ॥ १२ ॥ पुत्राभावेवधूःकुर्याद्भार्याभावेच सोदरः ॥ शिष्योवाब्राह्मणस्यैवसपिंडोवासमाचरेत् ॥ १३ ॥ ज्येष्ठस्यवाकनिष्ठस्यभ्रातुःपुत्रैश्चपौत्रकैः ॥ दशगात्रादिकं कार्यंपुत्रहीनेनरेखग ॥ १४ ॥ भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् ॥ सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीत् ॥ १५ ॥ पत्न्यश्चबह्व्यएकस्यचैकापुत्रवतीभवेत् ॥ सर्वास्ताःपुत्रवत्यःस्युस्तेनैकेनसुतेनहि ॥ १६ ॥ सर्वेषांपुत्रहीनानांमित्रःपिंडंप्रदापयेत् ॥ क्रियालोपोनकर्तव्यःसर्वाभावेपुरोहितः ॥ १७ ॥ स्त्रीवाऽथपुरुषःकश्चिदिष्टस्यकुरुतेक्रियाम् ॥ अनाथप्रेतसंस्कारात्कोटियज्ञफलंलभेत् ॥ १८ ॥ ॥ ॥ ॥ ॥

के पुत्रवान हैं ए मनुका वाक्य है ॥ १५ ॥ एक पुरुषके बहोत स्त्रियोंमें एक जो पुत्रवती हो तो उस एक पुत्रसे वे सब स्त्रियां पुत्रवती हैं ॥ १६ ॥ संपूर्ण पुत्रहीनवालोंको मित्र पिंड देवै परंतु क्रियालोप नहीं करे कोईभी नहीं हो तो पुरोहित करे ॥ १७ ॥ स्त्री हो अथवा पुरुष हो कोईभी मित्रकी क्रिया करते हैं अनाथ प्रेतके संस्कार करनेंसे उन्होंको करोड़ यज्ञोंका फल होता है ॥ १८ ॥ ॥ ॥

हे गरुड़ ! पिताकी दशगात्रादिक क्रिया पुत्रकरके करने योग्य हैं. बड़ा पुत्रभी मरा हो अत्यंत स्नेह हो तोभी पिता पुत्रकी क्रिया नहीं करै ॥ १९ ॥ जो कदाचित् पुत्र बहोत होंय तोभी एक पुत्र विधिसे क्रिया करे दशगात्र, सपिंडीकर्म, दूसरे सोलह श्राद्ध ॥ २० ॥ पुत्र न्यारे न्यारे हों तोभी एकसेही करनेयोग्य हैं. तथा न्यारे हों तो सांवत्सरादिक श्राद्ध जुदे जुदे करने ॥ २१ ॥ तिसीसे बड़ा पुत्र भक्तिसे दशगा-

पितुःपुत्रेणकर्तव्यंदशगात्रादिकंखग ॥ मृतेज्येष्ठेऽप्यतिस्नेहान्नकुर्वीतपितासुते ॥ १९ ॥ बहवोऽपियदापुत्राविधिमेकःसमाचरेत् ॥ दशगात्रंसपिंडत्वंश्राद्धान्यन्यानिषोडश ॥ २० ॥ एकेनैवतुकार्याणिसंविभक्तधनेष्वपि ॥ विभक्तैस्तुपृथक्कार्यंश्राद्धंसांवत्सरादिकम् ॥२१॥ तस्माज्ज्येष्ठःसुतोभक्त्यादशगात्रंसमाचरेत् ॥ एकभोजीभूमिशायीभूत्वाब्रह्मपरःशुचिः ॥२२॥ सप्तवारंपरिक्रम्यधरणींयत्फलंलभेत् ॥ क्रियांकृत्वापितुर्मातुस्तत्फलंलभतेसुतः ॥ २३ ॥ आरभ्यदशगात्रंचयावद्द्वैवार्षिकंभवेत् ॥ तावत्पुत्रःक्रियांकुर्वन्गयाश्राद्धफलंलभेत् ॥ २४ ॥ ॥ ॥ ॥

त्र करै, एक वख्त भोजन करे, पृथ्वीपर सोवे, ब्रह्मचारी पवित्र रहे ॥२२॥ सातबार पृथ्वीकी परिक्रमा करनेसे जो फल मिलता है वो फल पुत्रको माता पिताकी क्रिया करनेसे मिलता है ॥ २३ ॥ दशगात्रसे आरंभ लेकर, जहांतक वर्षी हो वहांतक क्रिया करनेसे गया श्राद्धके फलको प्राप्त होता है ॥ २४ ॥ ॥ ॥ ॥ ॥

कूप, तलाव, आराम, तीर्थ, देवस्थान इनमें कोईसेभी स्थानमें मध्यान्ह समयमें जाकर, अमंत्रक स्नान करना ॥ २५ ॥ वृक्षके नीचे प्रवित्र होकर, दक्षिणको मुख कर, स्थित हो, तहां वेदी करनी. उसको गोबरसे लीपनी ॥ २६ ॥ उस वेदीपर पान बिछा, दर्भोंको कौशिक ब्राह्मण स्थापित करना, उसको पाद्य अर्घ्यादिकोंसे पूजकर, "अतसीपुष्पसंकाशं" इस मंत्रसे नमस्कार करना ॥२७॥ उसके अगाड़ी पिंड देनेको कु-

कूपेतडागेवाऽऽरामेतीर्थेदेवालयेपिवा ॥ गत्वामध्यमयामेतुस्नानंकुर्यादमंत्रकम् ॥ २५ ॥ शुचिर्भूत्वावृक्षमूलेदक्षिणाभि
मुखःस्थितः ॥ कुर्याच्चवेदिकांतत्रगोमयेनोपलिप्यताम् ॥ २६ ॥ तस्यांपूर्णेदर्भमयंस्थापयेत्कौशिकंद्विजं ॥ तंपाद्यादिभिर
भ्यर्च्यप्रणमेदतसीतिच ॥२७॥ तदग्रेचततोदत्वापिंडार्थंकौशमासनम् ॥ तस्योपरिततःपिंडंनामगोत्रोपकल्पितम् ॥२८॥
दद्यात्तंडुलपाकेनयवपिष्टेनवासुतः ॥ उशीरंचंदनंभृंगराजपुष्पंनिवेदयेत् ॥ धूपंदीपंचनैवेद्यंमुखवासंचदक्षिणाम् ॥ २९ ॥
काकान्नंपयसोःपात्रेवर्धमानजलांजलीन् ॥ प्रेतायामुकनाम्नेचमद्दत्तमुपतिष्ठतु ॥ ३० ॥ ॥ ॥

शोंको आसन देना: उसके ऊपर नामगोत्रसे पिंड देना ॥ २८ ॥ चावलोंका पाक करके वा जवोंके आटासे देना. उशीर, चंदन भृंगराजके पुष्प, धूप, दीप, नैवेद्य, मुखवास, दक्षिणा ए अर्पण करना ॥ २९ ॥ काकवलि, जल, दूधके पात्रोंमें वर्धमान जलांजली ए अमुकनाम प्रेतको मेरी दीभई प्राप्त होवैं ॥ ३० ॥ ॥ ॥ ॥ ॥

अन्न, वस्त्र, जल, द्रव्य और जो कछु देतेहैं सो प्रेतशब्दसे जो दिया है सो मरेहुवेको अनंत फलदायक है ॥ ३१ ॥ तिसीसे आदिदिनसे लेकर, सपिंडीकर्मतक स्त्री अथवा पुरुषको प्रेतनामसे उच्चारण करना ॥ ३२ ॥ पहिले दिन जो विधिसे पिंड देवै उसी विधिसे उस अन्नसे नव पिंड देने ॥ ३३ ॥ नवमें दिन मृतकको स्वर्गमें जानेके वास्ते सब सपिंडोंकरके सहित तैलका उबटना करना ॥ ३४ ॥ बाहिर

अन्नंवस्त्रंजलंद्रव्यमन्यद्वादीयतेचयत् ॥ प्रेतशब्देनयद्दत्तंमृतस्यानंत्यदायकम् ॥ ३१ ॥ तस्मादादिदि[illegible]दूर्ध्वंप्राक्सपिंडीवि
धानतः ॥ योषितःपुरुषस्यापिप्रेतशब्दंसमुच्चरेत् ॥ ३२ ॥ प्रथमेऽहनियत्पिंडोदीयतेविधिपूर्वकं ॥ तेनैवविधिनान्नेननव
पिंडान्प्रदापयेत् ॥ ३३ ॥ नवमेदिवसेचैवसपिंडैःसकलैर्जनैः ॥ तैलाभ्यंगःप्रकर्तव्योमृतकस्वर्गकाम्य[illegible] ॥ ३४ ॥ ब
हिःस्नात्वागृहीत्वाचदूर्वालाजसमन्विताः ॥ अग्रतःप्रमदांकृत्वासमागच्छेन्मृतालयं ॥ ३५ ॥ दूर्वावत्कुलवृद्धिस्तेलाजा
इवविकासता ॥ एवमुक्त्वात्यजेद्गेहेलाजांदूर्वासमन्वितान् ॥ ३६ ॥ दशमेऽहनिमांसेनपिंडंदद्यात्खगेश्वर ॥ माषेणतन्नि
षे[illegible]द्वाकलौनपलपैतृकम् ॥ ३७ ॥ ॥ ॥ ॥ ॥

[illegible]न करके, दूध, चांवल, लेकर स्त्रियोंको अगाडी करकै, मरेहुवेके स्थानमें जाना ॥ ३५ ॥ दूर्वाकी जैसी तुम्हारे कुलकी वृद्धि [illegible] चावलोंजैसे विकसित हों ऐसे कहकर, दूधसहित चा[illegible]ल घरमें डालने ॥ ३६ ॥ हे गरुड़! दशवे दिन मांससे पिंड देना कलियुगमें [illegible]म्के निषेधमें उड़दोंकों देना ॥ ३७ ॥ ॥ ॥ ॥ ॥

दशवें दिन बांधवोंको मुंडनसहित क्षौर करना. क्रिया करनेवाले पुत्रका फेर मुंडन करना ॥ ३८ ॥ मिष्टान्नसे दश दिनोंमें एक ब्राह्मण जिमाना. हाथ जोड़, हरिको ध्यानकर, प्रेतकी मुक्तिकी प्रार्थना करना ॥ ३९ ॥ अतसीके पुष्प जैसा घनश्याम स्वरूप, पीतांबर वस्त्र, अखंडित स्वरूप ऐसे गोविंदको जो नमस्कार कर्तेहैं उनके भय नहीं विद्यमान है. ॥ ४० ॥ नहींहै आदि नाश ऐसे देव शंख चक्र गदा धारणकरे, अक्षय, कमलजैसे नेत्र ऐसे भगवान प्रेतको मोक्ष देवैं ॥ ४१ ॥ ऐसे प्रार्थनाको मंत्र श्राद्धके अंतमें नि-

दशमेदिवसेक्षौरंबांधवानांससमुंडनं ॥ क्रियाकर्तुःसुतस्यापिपुनर्मुंडनमाचरेत् ॥ ३८ ॥ मिष्टान्नैर्भोजयेदेकंदिनेषुदशसुद्विजम् ॥ प्रार्थयेत्प्रेतमुक्तिंचहरिंध्यात्वाकृतांजलिः ॥ ३९ ॥ अतसीपुष्पसंकाशंपीतवाससमच्युतं ॥ येनमस्यंतिगोविंदंनतेषांविद्यतेभयं ॥ ४० ॥ अनादिनिधनोदेवःशंखचक्रगदाधरः ॥ अक्षय्यःपुंडरीकाक्षप्रेतमोक्षप्रदोभव ॥ ४१ ॥ इतिसंप्रार्थनामंत्रंश्राद्धांतेप्रत्यहंपठेत् ॥ स्नात्वागत्वागृहेदत्वागोग्रासंभोजनंचरेत् ॥ ४२ ॥ ॥ इतिश्रीगरुडपुराणेसारोद्धारेदशगात्रविधिनिरूपणोनामैकादशोऽध्यायः ॥ ११ ॥ गरुडउवाच ॥ एकादशदिनस्यापिविधिंब्रूहिसुरेश्वर ॥ वृषोत्सर्गविधानंचवदमेजगदीश्वर ॥ १ ॥ ॥

त्य पढ़ना. स्नान कर, घरमें जाय, गोग्रास देकर, भोजन करना ॥ ४२ ॥ इति श्रीगरुडपुराणेसारोद्धारस्य ज्ञानबोधनीभाषाटीकायांदशगात्रविधिनिरूपणोनाम एकादशोऽध्यायः ॥ ११ ॥ अब गरुड़ कहतेहैं—हे सुरेश्वर! ग्यारहवें दिनकी विधि हमारेसे कहो. हे जगदीश्वर! वृषोत्सर्गविधानभी मेरेसे कहो ॥ १ ॥ ॥ ॥ ॥ ॥

श्रीभगवान् कहते हैं—ग्यारहवें दिन प्रातःकाल जलके सरोवरपर जाना वहां पारलौकिक सब क्रिया करनी ॥ २ ॥ वेदशास्त्रमें परायण ऐसे ब्राह्मणोंको निमंत्रण करना. हाथ जोड़, नमस्कार कर, प्रेतकी मुक्तिकी प्रार्थना करना ॥ ३ ॥ स्नान संध्यादिक कर्म करके, आचार्यभी पवित्र होवे. ग्यारहवें दिनके योग्यविधानविधिसे करने ॥ ४ ॥ दश दिनतक तो बिगर मंत्र श्राद्ध नामगोत्रसे करने. ग्यारहवें दिन प्रेतको मंत्रसहि-

श्रीभगवानुवाच ॥ ॥ एकादशेऽह्निगंतव्यंप्रातरेवजलाशये ॥ और्ध्वदेहिक्रियासर्वाकरणीयाप्रयत्नतः ॥ २ ॥ निमंत्रये
द्ब्राह्मणांश्चवेदशास्त्रपरायणान् ॥ प्रार्थयेत्प्रेतमुक्तिंचनमस्कृत्यकृतांजलिः ॥ ३ ॥ स्नानसंध्यादिकंकृत्वाह्याचार्योऽपिशुचि
र्भवेत् ॥ विधानंविधिवत्कुर्यादेकादशदिनोचितम् ॥ ४ ॥ अमंत्रंकारयेच्छ्राद्धंदशाहंनामगोत्रतः ॥ एकादशेऽह्निप्रेतस्यद
द्यात्पिंडंसमंत्रकम् ॥ ५ ॥ सौवर्णंकारयेद्विष्णुंब्रह्माणंरौप्यकंतथा ॥ रुद्रस्ताम्रमयःकार्योयमोलोहमयःखग ॥ ६ ॥ पश्चिमे
विष्णुकलशंगंगोदकसमन्वितम् ॥ तस्योपरिन्यसेद्विष्णुंपीतवस्त्रेणवेष्टितम् ॥ ७ ॥ पूर्वेतुब्रह्मकलशंक्षीरोदकसमन्वितम् ॥
ब्रह्माणंस्थापयेत्तत्रश्वेतवस्त्रेणवेष्टितम् ॥ ८ ॥ ॥ ॥ ॥ ॥

त पिंड देवे ॥ ५ ॥ सुवर्णके विष्णु करावे, रूपाके ब्रह्मा करावे, तामके महादेव करावे, हे गरुड़! लोहेके यम करावे ॥ ६ ॥ पश्चिममें विष्णुको कलश स्थापन करे उसमें गंगोदक भरे उस कलशपर पीतांबर पहरे विष्णुको स्थापित करे ॥ ७ ॥ पूर्वमें ब्रह्मकलश क्षीरोदकसहित स्थापित करे तहां श्वेतवस्त्र पहिरे ब्रह्माको स्थापित करे ॥ ८ ॥ ॥ ॥ ॥ ॥

उत्तरमें रुद्रकलश सहत घृतसे भरा स्थापित करे उसपर रक्तवस्त्र पहिरे रुद्रको स्थापित करे ॥ ९ ॥ दक्षिणमें यमघट इंद्रोदकसहित स्थापित करे काले वस्त्र पहिराय, उसपर यमको स्थापित करे ॥ १० ॥ मध्यमें मंडल करना उसपर पुत्र कौशिक ब्राह्मणको स्थापित करे पीछे दक्षिणाभिमुख हो, अपसव्यसे तर्पण करे ॥ ११ ॥ विष्णु, ब्रह्मा, शिव, धर्म इन्होंको वेदमंत्रोंसे तर्पण करे. होम करके पीछे, दशघटादि श्राद्ध

उत्तरस्यांरुद्रकुंभंपूरितंमधुसर्पिषा ॥ श्रीरुद्रंस्थापयेत्तत्ररक्तवस्त्रेणवेष्टितम् ॥ ९ ॥ दक्षिणस्यांयमघटमिंद्रोदकसमन्वितम् ॥ कृष्णवस्त्रेणसंवेष्ट्यतस्योपरियमंन्यसेत् ॥ १० ॥ मध्येतुमंडलंकृत्वास्थापयेत्कौशिकंसुतः ॥ दक्षिणाभिमुखोभूत्वाऽपसव्येनचतर्पयेत् ॥११॥ विष्णुंविधिंशिवंधर्मंवेदमंत्रैश्चतर्पयेत् ॥ होमंकृत्वाचरेत्पश्चाच्छ्राद्धंदशघटादिकम् ॥ १२ ॥ गोदानंचततोदद्यात्पितृणांतारणायवै ॥ गौरेषाहिमयादत्ताप्रीतयेतेऽस्तुमाधव ॥ १३ ॥ उपभुक्तंतुतस्यासीद्वस्त्रभूषणवाहनम् ॥ घृतपूर्णकांस्यपात्रंसप्तधान्यंतदीप्सितम् ॥ १४ ॥ तिलाद्यष्टमहादानमंतकालेनचेत्कृतम् ॥ शय्यासमीपेधृत्वैतद्दानंतस्याःप्रदापयेत् ॥ १५ ॥ ॥ ॥

करना ॥ १२ ॥ पीछे गोदान देना, पितृश्वरोंको तिरानेके लिये यह गौ मैनें दीहै सो हे माधव! तुम्हारी प्रसन्नताके अर्थ होवे ॥ १३ ॥ उसका भोगाहुवा जो वस्त्र आभूषण वाहन घृतसे भर, कांशाका पात्र सप्तधान्य ए उसके वांछित ॥ १४ ॥ तिलादि अष्ट महादान जो अंतकालमें नहीं किया हो तो शय्याके समीप धारण कर, उस शय्याका दान देंना ॥ १५ ॥ ॥ ॥ ॥

ब्राह्मणके चरण धोकर, वस्त्रादिकोंसे पूजने उसको सिद्ध किया अन्न देना. मोदक, अपूप, दूध ए देने ॥ १६ ॥ पुत्र तिस समयमें शय्यापर सुवर्णको पुरुष स्थापित करे. पूजा करके, विधिसे शय्या देवे ॥ १७ ॥ प्रेतकी मूर्तिसहित सर्वसामग्रीसहित हे ब्राह्मण! यह प्रेतशय्या तुमको मैने अर्पण करी है ॥ १८ ॥ ऐसे आचार्य कुटुंबी ब्राह्मणको देना पीछे परिक्रमा करके नमस्कार करके देवे ॥ १९ ॥ ऐसे शय्या देनेसे नव-

प्रक्षाल्यविप्रचरणौपूजयेदंबरादिभिः ॥ सिद्धान्नंतस्यदातव्यंमोदकाऽपूपकाःपयः ॥ १६ ॥ स्थापयेत्पुरुषंहैमंशय्योपरि तदासुतः ॥ पूजयित्वाप्रदातव्यामृतशय्यायथोदिता ॥ १७ ॥ प्रेतस्यप्रतिमायुक्तासर्वोपकरणैर्वृता ॥ प्रेतशय्यामयाह्येषा तुभ्यंविप्रनिवेदिता ॥ १८ ॥ इत्याचार्यायदातव्याब्राह्मणायकुटुंबिने ॥ ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत् ॥ १९ ॥ एवंशय्याप्रदानेनश्राद्धेननवकादिना ॥ वृषोत्सर्गविधानेनप्रेतोयातिपरांगतिम् ॥ २० ॥ एकादशेह्निविधिनावृषोत्सर्गंस माचरेत् ॥ हीनांगंरोगिणंबालंत्यक्त्वाकुर्यात्सलक्षणम् ॥ २१ ॥ रक्ताक्षःपिंगलोयस्तुरक्तःशृंगेगलेखुरे ॥ श्वेतोदरःकृष्णपृ ष्ठोब्राह्मणस्यविधीयते ॥ २२ ॥ ॥ ॥ ॥ ॥ ॥

कादि श्राद्ध करनेसे वृषोत्सर्ग विधिसे प्रेत परम गतिको प्राप्त होता है ॥ २० ॥ ग्यारहवें दिन विधिसे वृषोत्सर्गआचरण करे. हीन अंग, रोगी, बालक इन्होंको त्यागके, लक्षणोंसहित करे ॥ २१ ॥ लालनेत्र और जो पीला हो, शृंग गला और खुरोंमें रक्त हो, सपेद उदर हो, काली पीठ हो, ऐसा वृषोत्सर्ग ब्राह्मणको करना ॥ २२ ॥ ॥ ॥ ॥ ॥

जिसको सचिक्कण वर्ण हो और लाल होय वो क्षत्रियको कह्या है पीलवर्णको वैश्यको कह्या है कृष्णवर्णको शूद्रको कह्या है ॥ २३ ॥ जो सब अंगमें पीला होय पूंछ पदोंमें सपेद होय उसको पिंगवृष कहते हैं वो पितृश्वरोंको प्रीति बढ़ाता हैं ॥ २४ ॥ जिस वृषके चरण, मुख, पूंछ सपेद हैं जो लाषके रसजैसा वर्णका है उसको नीलवृष ऐसा कहते हैं ॥ २५ ॥ जो वर्णसे लोहित है, मुख और पूंछसे सपेद है, खुर

सुस्निग्धवर्णोयोरक्तःक्षत्रियस्यविधीयते ॥ पीतवर्णश्चवैश्यस्यकृष्णःशूद्रस्यशस्यते ॥ २३ ॥ यस्तुसर्वांगपिंगःस्याच्छ्वेतःपुच्छे पदेषुच ॥ सपिंगोवृषइत्याहुःपितृणांप्रीतिवर्धनः ॥ २४ ॥ चरणास्तुमुखंपुच्छंयस्यश्वेतानिगोपतेः ॥ लाक्षारससवर्णोयःस नीलइतिकीर्तितः ॥ २५ ॥ लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः ॥ पिंगःखुरविषाणाभ्यांरक्तनीलोनिगद्यते ॥ २६ ॥ स र्वांगेष्वेकवर्णोयःपिंगःपुच्छेखुरेषुयः ॥ तंनीलपिंगमित्याहुःपूर्वजोद्धारकारकम् ॥ २७ ॥ पारावतसवर्णस्तुललाटेतिलका न्वितः ॥ तंबभ्रुनीलमित्याहुःपूर्णसर्वांगशोभनम् ॥ २८ ॥ ॥ ॥ ॥ ॥

और शींगोंसे पीला है उसको रक्तनील कहते हैं ॥ २६ ॥ जो सर्व अंगमें एकसा वर्ण हो, पूंछ और खुरोंमें पीला हो उसको नीलपिंग कहते हैं वोभी पितृश्वरोंका उद्धार करता है ॥ २७ ॥ कबूतरजैसा वर्णका हो, ललाटमें तिलक हो, उसको बभ्रुनील ऐसे कहते हैं उसको पूर्णअंग और सर्वअंगसे शोभित लेना ॥ २८ ॥ ॥ ॥ ॥ ॥

जो सबशरीरमें नीला होय दोनों नेत्रोंमें लाल होय उसकोभी महानील कहते हैं. नील पांच प्रकारका है ॥ २९ ॥ उस वृषको अवश्य छोड़ना वृषको घरमें नहीं रखना तिसकी इस लोकमें पुरातनी कथा चलती है ॥ ३० ॥ बहोत पुत्रोंकी वांछा करनी कारण बहोत हों तो कोई एक गयामें ज़ाता है गौरी अर्थात् अष्ट वर्षकी कन्याको विवाह करता है वा नील वृष छोड़ता हैं ॥ ३१ ॥ वही पुत्र माना है जो

नीलःसर्वशरीरेषुरक्तश्चनयनद्वये ॥ तमप्याहुर्महानीलंनीलःपंचविधःस्मृतः ॥ २९ ॥ अवश्यमेवमोक्तव्योनसधार्योगृहेभवेत् ॥ तदर्थमेषाचरतिलोकेगाथापुरातनी ॥ ३० ॥ एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् ॥ गौरींविवाहयेत्कन्यांनीलंवावृषमुत्सृजेत् ॥ ३१ ॥ सएवपुत्रोमंतव्योवृषोत्सर्गंतुयश्चरेत् ॥ गयायांश्राद्धदाताचयोऽन्योविष्ठासमःकिल ॥ ३२ ॥ रौरवादिषुयेकेचित्पच्यंतेयस्यपूर्वजाः ॥ वृषोत्सर्गेणतान्सार्वांस्तारयेदेकविंशतिम् ॥ ३३ ॥ वृषोत्सर्गंकिलेच्छंतिपितरःस्वर्गताअपि ॥ अस्मद्वंशेसुतःकोऽपिवृषोत्सर्गंकरिष्यति ॥ ३४ ॥ ॥ ॥ ॥

माता पिताके संग वृषोत्सर्ग करता है. जो गयामें श्राद्ध देता है और यह नहीं करनेवाला विष्ठासम कहा है ॥ ३२ ॥ रौरवादि नरकोंमें जिसके पितृश्वर पचते हैं वे सब एकविंश पीढ़ीतक वृषोत्सर्गसे तिरते हैं ॥ ३३ ॥ वृषोत्सर्ग किया तो निश्चय पितृश्वर स्वर्गमें गयेभी इच्छा करते हैं कि– हमारे वंशमें कोई पुत्र वृषोत्सर्ग करैगा ॥ ३४ ॥ ॥ ॥ ॥ ॥ ॥

उस वृषके त्यागनेसे हम समग्र परमगतिको जावैंगे. सब यज्ञोंमें हमारेको वृषयज्ञ परम मुक्ति दाता है ॥ ३५ ॥ तिसीसे पितृश्वरोंकी मुक्तिके लिये वृषयज्ञ आचरण करना यथोक्त विधिसे संपूर्ण यत्नसे करना ॥ ३६ ॥ ग्रहोंको स्थापन करके, उन उनके मंत्रोंसे पूजन करना. शास्त्रोक्त विधिसे होम करना. पीछे वृषकी पूजा करनी ॥ ३७ ॥ बछरा बछिया लाकर, उनके कंकण बांधना उस वक्त विवाहविधिसे स्तंभ रोपना

तदुत्सर्गाद्वयंसर्वेयास्यामःपरमांगतिम् ॥ सर्वयज्ञेषुचास्माकंवृषयज्ञोहिमुक्तिदः ॥ ३५ ॥ तस्मात्पितृविमुक्त्यर्थंवृषयज्ञंसमाचरेत् ॥ यथोक्तेनविधानेनकुर्यात्सर्वप्रयत्नतः ॥ ३६ ॥ ग्रहाणांस्थापनंकृत्वातत्तन्मंत्रैश्चपूजनं ॥ होमंकुर्याद्यथाशास्त्रंपूजयेद्वृषमातुरः ॥३७॥ वत्संवत्सींसमानाय्यबध्नीयात्कंकणंतयोः ॥ वैवाह्येनविधानेनस्तंभमारोपयेत्तदा ॥ ३८ ॥ स्नापयेच्चवृषंवत्सींरुद्रकुंभोदकेनच ॥ गंधमाल्यैश्चसंपूज्यकारयेच्चप्रदक्षिणाम् ॥ ३९ ॥ त्रिशूलंदक्षिणेपार्श्वेवामेचक्रंप्रदापयेत् ॥ तंविमुच्यांजलिंबध्वापठेन्मंत्रमिमंसुतः ॥ ४० ॥ धर्मस्त्वंवृषरूपेणब्रह्मणानिर्मितःपुरा ॥ तवोत्सर्गप्रदानेनतारयस्वभवार्णवात् ॥ ४१ ॥ ॥ ॥

॥ ३८ ॥ वृषका और बछियाका रुद्रकुंभके कलशसे स्नान कराना गंधमालासे पूजन करके, प्रदक्षिणा करनी ॥ ३९ ॥ दक्षिणबाजूमें त्रिशूल, वामबाजूमें चक्र देना. पीछे उसको छोड़के, हाथ जोड़, पुत्र यह मंत्र पढ़ै ॥ ४० ॥ तुम साक्षात् धर्म हो 'वृषरूपसे तुमको पहले ब्रह्माने रचा है सो तुम्हारे छोड़नेके दानसे पितृश्वरोंको भवसागरसे तिरावो ॥ ४१ ॥ ॥ ॥ ॥ ॥

ऐसे मंत्रोंसे नमस्कार कर, बछरा बछिया छोड़ना. हे गरुड़! उनको मैं कामना देता हूं प्रेतको मोक्ष देताहौं ॥ ४२ ॥ तिसीसे इस वृषोत्सर्गको करना इसके फलको जीवता करै तौभी प्राप्त होताहै अपुत्र आप करनेंसे परमगतिको सुखसे जाताहै ॥ ४३ ॥ कार्तिकआदि शुभ महीनोमें, उत्तरायण सूर्यमें, शुक्लपक्ष अथवा कृष्णपक्षमें, द्वादशी आदितिथियोंमें ॥ ४४ ॥ दोनों ग्रहणोंमें, पवित्र तीर्थमें, दोनों अयनोंमें, अर्थात् मेष तुलाकी

इतिमंत्रान्नमस्कृत्यवत्संवत्सींमनुत्सृजेत् ॥ वरदोऽहंसदातस्यप्रेतमोक्षंददामिच ॥ ४२ ॥ तस्मादेषःप्रकर्तव्यस्तत्फलंजीवतोभवेत् ॥ अपुत्रस्तुस्वयंकृत्वासुखंयातिपरांगतिम् ॥ ४३ ॥ कार्तिकादौशुभेमासेचोत्तरायणगेरवौ ॥ शुक्लपक्षेऽथवा कृष्णेद्वादश्यादितिथौतथा ॥ ४४ ॥ ग्रहणद्वितयेचैवपुण्यतीर्थेऽयनद्वये ॥ विषुवद्वितयेचापिवृषोत्सर्गंसमाचरेत् ॥ ४५ ॥ शुभलग्नेमुहूर्तेचशुचौदेशेसमाहितः ॥ ब्राह्मणंतुसमाहूयविधिज्ञंशुभलक्षणम् ॥ ४६ ॥ जपैर्होमैस्तथादानैःप्रकुर्यादेहशोधनम् ॥ पूर्ववत्सकलंकृत्यंकुर्याद्धोमादिलक्षणं ॥ ४७ ॥ शालग्रामंचसंस्थाप्यवैष्णवंश्राद्धमाचरेत् ॥ आत्मश्राद्धंततःकुर्याद्दद्याद्दानंद्विजन्मने ॥ ४८ ॥ ॥ ॥ ॥ ॥

संक्रांतिके दिनोमें इन्होंमें वृषोत्सर्ग करना ॥ ४५ ॥ शुभदेशमें शुभलग्न और शुभमुहूर्तमें सावधान होकर, विधिका ज्ञाता शुभ लक्षणवाले ब्राह्मणको बुलाकर ॥ ४६ ॥ जप होम दानसे देहशुद्धि करनी पहलेके जैसे होमादि लक्षण सब कृत्य करने ॥ ४७ ॥ शालिग्राम भगवानको स्थापित करके, वैष्णवश्राद्ध करना पीछे आत्मश्राद्ध करके, ब्राह्मणके अर्थ दान देना ॥ ४८ ॥ ॥ ॥ ॥

ऐसे हे गरुड़ ! जो पुत्रवान वा अपुत्रवान करताहै उसको सब कामको फल वृषोत्सर्गसे होताहै ॥ ४९ ॥ अग्निहोत्रादि यज्ञोंसे, नाना प्रकारके दानोंसे उस गतिको नहीं प्राप्त होताहै जिस गतिको वृषोत्सर्गसे होताहै ॥ ५० ॥ बाल्य अवस्थामें, कौमारमें, पौगंडमें, यौवनमें, वृद्धामें जो पाप किया है वो सब वृषोत्सर्गसे नष्ट होताहै इसमें संदेह नहींहै ॥ ५१ ॥ मित्रद्रोही, कृतघ्नी, मदिरा पीनेवाला, गुरुकी शय्याका गामी,

एवंयःकुरुतेपक्षिन्नपुत्रस्यापिपुत्रवान् ॥ सर्वकामफलंतस्यवृषोत्सर्गात्प्रजायते ॥ ४९ ॥ अग्निहोत्रादिभिर्यज्ञैर्दानैश्चविविधैरपि ॥ नतांगतिमवाप्नोतिवृषोत्सर्गेणयांलभेत् ॥ ५० ॥ बाल्येकौमारेपौगंडेयौवनेवार्धकेकृतं ॥ यत्पापंतद्विनश्येतवृषोत्सर्गान्नसंशयः ॥ ५१ ॥ मित्रद्रोहीकृतघ्नश्चसुरापोगुरुतल्पगः ॥ ब्रह्महाहेमहारीचवृषोत्सर्गात्प्रमुच्यते ॥ ५२ ॥ तस्मात्सर्वप्रयत्नेनवृषयज्ञंसमाचरेत् ॥ वृषोत्सर्गसमंपुण्यंनास्तिताक्ष्यंजगत्त्रये ॥ ५३ ॥ पतिपुत्रवतीनारीद्वयोरग्रेमृतायदि ॥ वृषोत्सर्गंनैवकुर्याद्दद्याद्गांचपयस्विनीम् ॥ ५४ ॥ वृषभंवाहयेद्यस्तुस्कंधेपृष्ठेचखेचर ॥ सपतेन्नरकेघोरेयावदाभूतसंप्लवम् ॥ ५५ ॥ ॥ ॥

ब्राह्मणकी हत्या करनेवाला, सुवर्ण चोरनेवाला ए पापी वृषोत्सर्गसे सर्व पापोंसे छूटते हैं ॥ ५२ ॥ तिसीसे सर्व प्रयत्नसे वृषयज्ञ करना. हे गरुड़! वृषोत्सर्गजैसा पुण्य त्रिलोकीमें नहींहै ॥ ५३ ॥ पति पुत्रके जीवते जो स्त्री मरजाय तो वृषोत्सर्ग नहीं करना दूधवाली गौका दान देना ॥ ५४ ॥ वृषको जो कंधा पीठपर वाहता है हे गरुड़! वो मनुष्य कल्पपर्यंत घोर नरकोंमें पड़ताहै ॥ ५५ ॥ ॥

जो निर्दयी वृषको मूठी, लकड़ीसें मारताहै वो मनुष्य कल्पपर्यंत यमराजकी यातना भोगताहै ॥ ५६ ॥ ऐसे वृषोत्सर्ग करके, षोड़श श्राद्ध करने सपिंडी करनेके पीछे सो मै तुमको कहताहौं ॥ ५७ ॥ मृतकस्थानमें, द्वारमें, अर्द्धमार्गमें, चितामें, शवके हाथमें, अस्थि-संचयसमयमें, ऐसे छे पिंड और दश पिंड दश दिनमें ॥ ५८ ॥ ए मलीनषोड़शी प्रथम कहीहै. दूसरी मध्यषोडशी तुमको कहताहौं

वृषभंताडयेद्यस्तुनिर्दयोमुष्टियष्टिभिः ॥ सनरःकल्पपर्यंतंभुंजतेयमयातनाम् ॥ ५६ ॥ एवंकृत्वावृषोत्सर्गंकुर्याच्छ्राद्धानिषोडश ॥ सपिंडीकरणादर्वाक्कृतदहंकथयामिते ॥ ५७ ॥ स्थानेद्वारेऽर्धमार्गेचचितायांशवहस्तकें ॥ अस्थिसंचयनेषष्ठोदशपिंडादशाह्निकाः ॥ ५८ ॥ मलिनंषोडशंचैतत्प्रथमंपरिकीर्तितम् ॥ अन्यच्चषोडशंमध्येद्वितीयंकथयामिते ॥ ५९ ॥ प्रथमंविष्णवेदद्याद्द्वितीयंश्री शिवायच ॥ याम्यायपरिवारायतृतीयंपिंडमुत्सृजेत् ॥ ६० ॥ चतुर्थंसोमराजायहव्यवाहायपंचमम् ॥ कव्यवाहायषष्ठंचदद्यात्का लायसप्तमम् ॥ ६१ ॥ रुद्रायचाष्टमंदद्यान्नवमंपुरुषायच ॥ प्रेतायदशमंचैवैकादशंविष्णवेनमः ॥ ६२ ॥ ॥

॥ ५९ ॥ प्रथम विष्णुको पिंड देना, दूजा शिवको देना, तीजा यमके परिवारको देना, ॥ ६० ॥ चौथा सोमराजको देना, पंचम हव्यवाह अग्निको देना, छठा कव्यवाहको देना, सप्तम कालको देना, ॥ ६१ ॥ महादेवको अष्टम पिंड देना, नवमा पुरुषको देना, प्रेतको दशमा देना, ग्यारहवां विष्णुको देना, ॥ ६२ ॥ ॥ ॥ ॥ ॥

बारहवां ब्रह्माको देना, विष्णुको तेहरवां देना, चौदहवां शिवको देना, यमको पंद्रहवां देना ॥ ६३ ॥ हे गरुड़! तत्पुरुषको सोलहवां पिंड देना. ए मध्यमषोड़शी तत्वज्ञाता पुरुष कहते हैं ॥ ६४ ॥ बारह महीनेमें बारह पाक्षिक, त्रिपाक्षिक, ऊनषाण्मासिक, उनाब्दिक ए उत्तम षोड़शी मैनें तुमको कही है सो खीर पकाकर, हे गरुड़! ग्यारहवें दिन करनी ॥ ६५॥ ६६ ॥ ऐसे तीनो षोड़शियोंके अड़तालीश श्राद्ध प्रेतपना-

द्वादशंब्रह्मणेदद्याद्विष्णवेचत्रयोदशम् ॥ चतुर्दशंशिवायैवयमायदशपंचकम् ॥ ६३ ॥ दद्यात्तत्पुरुषायैवपिंडंषोडशकंखग ॥ मध्यंषोडशकंप्राहुरेतत्तत्त्वविदोजनाः ॥ ६४ ॥ द्वादशप्रतिमासेषुपाक्षिकंचत्रिपाक्षिकम् ॥ न्यूनषाण्मासिकंपिंडंदद्यान्न्यूनाब्दिकंतथा ॥ ६५ ॥ उत्तमंषोडशंचैतन्मयातेपरिकीर्तितम् ॥ श्रपयित्वाचरुंतार्क्ष्यकुर्यादेकादशेहनि ॥ ६६ ॥ चत्वारिंशत्तथैवाष्टौश्राद्धंप्रेतत्वनाशनम् ॥ यस्यजातंविधानेनसभवेत्पितृपंक्तिभाक् ॥ ६७ ॥ पितृपंक्तिप्रवेशार्थंकारयेत्षोडशत्रयम् ॥ एतच्छ्राद्धविहीनश्चेत्प्रेतोभवतिसुस्थिरम् ॥ ६८ ॥ यावन्नदीयतेश्राद्धंषोडशत्रयसंज्ञकम् ॥ स्वदत्तंपरदत्तंचतावन्नैवोपतिष्ठते ॥ ६९ ॥ ॥

को नाश करते हैं. जिसकी विधिसे होते हैं वो पितृश्वरोंकी पंक्तिमें प्राप्त होता है ॥ ६७ ॥ सो पितृपंक्तिमें प्रवेश होनेको तीनों षोड़शी करनी. ए कहेभये अड़तालीश श्राद्धोंसे रहित बहोत कालतक प्रेत रहता है ॥ ६८ ॥ जहांतक तीनों षोड़शीका श्राद्ध प्राणीको नहीं देता है तहांतक अपना वा दूसरेका दिया नहीं मिलता है ॥ ६९ ॥ ॥ ॥ ॥ ॥ ॥

तिसीसें पुत्र त॰ ॱ षोड़शी करे अथवा स्त्री अपने पतिकी करै तौ अनंत कल्याण होताहैं ॥ ७० ॥ मरेहुवे पतिकी जो स्त्री ऊर्ध्वदैहिक क्रि-
या करतीहै तथा क्ष .तिथिमें, ॱ ाश्विनमें, श्राद्धपक्षमें, श्राद्ध करतीहै उसको मैं सती कहताहूं ॥ ७१ ॥ वह स्त्री तौ पतिके उपकारके वास्ते
जीवतीहै उसको जीवन सफल है. जो मरेहुवे पतिको सेवतीहै ॥ ७२ ॥ अथवा कोई जो प्रमादसे अग्नि वा जलसे मरंजाय तौ उसके संस्कार-

तस्मात्पुत्रेणकर्तव्यंविधिनाषोडशत्रयम् ॥ भर्तुर्वाकुरुतेपत्नीतस्यश्रेयोह्यनंतकम् ॥ ७० ॥ संपरेतस्ययापत्युःकुरुतेचौर्ध्वदेहिकम् ॥
क्षयाहंपाक्षिकश्राद्धंसासतीत्युच्यतेमया ॥ ७१ ॥ उपकारायसाभर्तुर्जीवत्येषापतिव्रता ॥ जीवितंसफलंतस्यायामृतंस्वामिनंभजेत्
॥ ७२ ॥ अथकश्चित्प्रमादेनम्रियतेवह्निवारिभिः ॥ संस्कारप्रमुखंकर्मसर्वंकुर्याद्यथाविधि ॥ ७३ ॥ प्रमादादिच्छयावापिनागाद्वा
म्रियतेयदि ॥ पक्षयोरुभयोर्नागंपंचमीषुप्रपूजयेत् ॥ ७४ ॥ कुर्यात्पिष्टमयींलेख्यांनागभोगाकृतिंभुवि ॥ अर्चयेत्तांसितैःपुष्पैः
सुगंधैश्चंदनेनच ॥ ७५ ॥ प्रदद्याद्धूपदीपौचतंडुलांश्चतिलान्क्षिपेत् ॥ आमपिष्टंचनैवेद्यंक्षीरंचविनिवेदयेत् ॥ ७६ ॥ ॥

आदि सर्व कर्म यथाविधि करना ॥ ७३ ॥ प्रमादसे वा इच्छासे जो कदाचित् सर्पसे मर जाय तो दोनोपक्षमें पंचमीको नाग पूजना ॥ ७४ ॥
आटाकी वा पृथ्वीपर लिखी हुई सर्पके शरीरकी आकृति करना. उसको सपेद सुगंधित पुष्पोंसे चंदनसे पूजना ॥ ७५ ॥ धूप, दीप, देना.
चांवल और तिल डालना, आटाकी नैवेद्य, दूध, अर्पण करना ॥ ७६ ॥ ॥ ॥ ॥

ब्राह्मणको शक्तिसे सुवर्णको सर्प और गोदान देना, पीछे हाथ जोड़के बोलना. हमारे पर नागराजा प्रसन्न होवै ॥ ७७ ॥ फेर उनकी नारायणबलिकी क्रिया करनी. तिससे स्वर्गमें वास प्राप्त होताहै और सब पापोंसे छूटताहै ॥ ७८ ॥ ऐसे सर्वक्रिया करके, जलसे भरके, अन्नसहित घटदान वर्षपर्यंत नित्य देना वा एकदिवसमें ग्यारहवें दिन तीनशो साठ पिंड और जलांजलि देनी ॥ ७९ ॥ ग्यारहवें दिवस कर्म करके, पीछे

सौवर्णशक्तितोनागंगांचदद्याद्द्विजन्मने ॥ कृतांजलिस्ततोब्रूयात्प्रीयतांनागराडिति ॥ ७७ ॥ पुनस्तेषांप्रकुर्वीतनारायणबलिक्रियाम् ॥ तयालभंतेस्वर्वासंमुच्यंतेसर्वपातकैः ॥ ७८ ॥ एवंसर्वक्रियांकृत्वाघटंसान्नंजलान्वितम् ॥ दद्यादब्दंयथासंख्यान्पिंडान्वासजलान्क्रमात् ॥ ७९ ॥ एवमेकादशेकृत्वाकुर्यात्सापिंडनंततः ॥ शय्यापदानांदानंचकारयेत्सूतकेगते ॥ ८० ॥ इतिश्रीगरुडपुराणेसारोद्धारेएकादशदिनविधिनिरूपणेद्वादशोऽध्यायः ॥ १२ ॥ ॥ गरुडउवाच ॥ ॥ सपिंडनविधिंब्रूहिसूतकस्यचनिर्णयं ॥ शय्यापदानांसामग्रींतेषांचमहिमाप्रभो ॥ १ ॥ ॥ ॥ ॥ ॥

बारहवें दिन सपिंडीकर्म करना और सूतक निवृत्तहुवे शय्यादान तथा पददान देना ॥ ८० ॥ इति ज्ञानबोधिनीभाषाटीकायां एकादशदिनविधिनिरूपणो नाम द्वादशोऽध्यायः ॥ १२ ॥ गरुड़जी पूछते हैं हे प्रभो! सपिंडनकी विधि कहो और सूतकके निर्णय कहो. शय्यादान पददानकी सामग्री कहो और उनका फल मेरे प्रति कहो ॥ १ ॥ ॥ ॥ ॥ ॥

अब भगवान कहतेहैं हे गरुड़ ! सुनो सपिंडीआदि अखिलक्रिया कहताहूं जिस सपिंडी क्रियासे प्रेतनामको त्यागके, पितृगणमें जाताहै ॥ २ ॥ जिन्होंका पिंड पितामह शिवादिकोंमें नहीं मिलाहै उन्होंको पुत्रोंसे दियाहुवा अनेक प्रकारका दान है तोभी नहीं मिलताहै ॥ ३ ॥ सपिंडी करे बिगर पुत्र सदा अशुद्ध रहता है कभी नहीं शुद्ध होताहै सूतकभी निवृत्त नहीं होताहै ॥४॥ तिसीसे पुत्रकरके, सूतकके अंतमें सपिंडन कर-

श्रीभग[illegible]वाच ॥ शृणुतार्क्ष्यप्रवक्ष्यामिसापिंड्याद्यखिलांक्रियां ॥ प्रेतनामपरित्यज्ययथापितृगणेविशेत् ॥ २ ॥ नपिंडोमिलि त[illegible]षांपितामहशिवा[illegible]षु ॥ नोपतिष्ठंतिदानानिपुत्रैर्दत्तान्यनेकधा ॥ ३ ॥ अशुद्धःस्यात्सदापुत्रोनशुद्ध्यंतिकदाचन ॥ सूतकंन निवर्तेतसपिंडीकरणंवि[illegible]ा ॥ ४ ॥ तस्मात्पुत्रेणकर्तव्यंसूतकांतेसपिंडनम् ॥ सूतकंतेप्रवक्ष्यामिसर्वेषांचयथोचितं ॥ ५ ॥ ब्राह्म णस्तुदशाहेनक्षत्रियोद्वादशेहनि ॥ वैश्यःपंचदशाहेनशूद्रोमासेनशुध्यति ॥ ६ ॥ दशाहेनसपिंडास्तुशुद्ध्यंतिप्रेतसूतके ॥ त्रिरा त्रेणसकुल्यास्तुस्नात्वाशुध्यंतिगोत्रजाः ॥ ७ ॥ ॥ ॥ ॥ ॥

ना तुमको सब वर्णोंको यथोचित सूतक कहता हूं ॥ ५ ॥ ब्राह्मण दश दिन रात्रिसे शुद्ध होताहै, क्षत्रिय बारह रात्रिसे शुद्ध होता है. वैश्य पन्द्रह रात्रि दिनसे, शूद्र एकमाससे शुद्ध होताहै ॥ ६ ॥ प्रेतसूतकमें दशदिनसे सपिंड अर्थात् चार पीढ़ीतकके शुद्ध होतेहैं, तीन रात्रिसे सकुल्य अर्थात् सातपीढ़ीतकके शुद्ध होतेहैं, गोत्रज अर्थात् दशवीं पीढ़ीतक स्नानमात्रसे शुद्ध होतेहैं ॥ ७ ॥ ॥ ॥

चौथ पुरुषतक यानी सपिंड दशरात्रीसे शुद्ध होताहै, पंचम पुरुष छह रात्रिसे, छट्ठा चारदिवससे, सातवां तीनदिनसे ॥ ८ ॥ अष्टम एकदिनसे नवमां दोपहरमें, दशवां स्नानमात्रसे. इस प्रकार मृतक और जन्मसूतक रहता है ॥९॥ देशांतरमें गया ऐसा जिसदिन सुनै उसीदिन जितने द-शदिनमेंसे बाकी रहैं उतने दिन अशुद्ध रहताहै ॥ १० ॥ जो दशदिन बीते बाद सुनैतौ तीनरात्रि अशुद्ध रहताहै. एक वर्ष व्यतीत हुवे सुनै तौ स्नानमात्रसे शुद्ध होता है ॥ ११ ॥ जो मृतक सूतकके आदिके दोभाग रहैं तबतक यानी छहदिनके मध्यमें दूसरा सूतक होजाय तौ आदि-

चतुर्थेदशरात्रंस्यात्षण्णिशाःपुंसिपंचमे ॥ षष्ठेचतुरहःप्रोक्तंसप्तमेचदिनत्रयम् ॥ ८ ॥ अष्टमेदिनमेकंतुनवमेप्रहरद्वयम् ॥ दशमे स्नानमात्रंहिमृतकंजन्मसूतकम् ॥ ९ ॥ देशांतरगतःकश्चिच्छृणुयाद्योह्यहर्निशम् ॥ यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेत् ॥ १० ॥ अतिक्रांतेदशाहेतुत्रिरात्रमशुचिर्भवेत् ॥ संवत्सरेव्यतीतेतुस्नानमात्राद्विशुध्यति ॥ ११ ॥ आद्यभागद्वयंयावन्मृतकस्यचसूतके ॥ द्वितीयेपतितेचाद्यात्सूतकाच्छुद्धिरिष्यते ॥ १२ ॥ आदंतजननात्सद्यआचौलान्नैशिकीस्मृता ॥ त्रिरात्रमाव्रतादेशाद्दशरात्रम तःपरम् ॥ १३ ॥ आजन्मनस्तुचौलांतंयत्रकन्याविपद्यते ॥ सद्यःशौचंभवेत्तत्रसर्ववर्णेषुनित्यशः ॥ १४ ॥ ॥

के सूतकसे दूसरा सूतक शुद्ध होताहै ॥ १२ ॥ दांत आनेके पहिले स्नानमात्रसे शुद्धि है, दांत आनेके पीछे चौलकर्मतक एक रात्रिसे शुद्धि है, चौलकर्मके पीछे उपवीतसंस्कारके पहले, तीनरात्रिसे शुद्धिहै इसके आगे दशरात्रिसे शुद्धि है ॥ १३ ॥ जन्मसे लेकर, चौलकर्मतक अर्थात् सत्ताईस मासतक जो कन्या मरजाय तौ स्नानमात्रसे शुद्ध होताहै ए सर्व वर्णोंमें नित्य है ॥ १४ ॥ ॥

सत्ताईस माससे अगाड़ी सगाईतक एकदिनसे शुद्धि है, इसके अगाड़ी बड़ी हुई कन्याको तीन रात्रिका अशौच है, ऐसा निश्चय है ॥ १५ ॥ वाग्दान अर्थात् सगाई करे पींछे पिता और वर दोनोंको तीन दिवसका कारण है और विवाह करे पीछे पतिकेही कारण रहता है और पिताके नहीं ॥ १६ ॥ जो छह मासके अंदर गर्भस्राव हो तो मासकी बराबर दिनोंसे उसकी माताके सूतक रहता है ॥ १७ ॥ इसके अगाड़ी छे माससे पीछे गर्भस्रावसे अपनी जातिमें कहा सूतक माताके होता है और सपिंडोंके गर्भस्रावमें स्नानमात्रसे शुद्धि होती है

ततोवाग्दानपर्यंतंयाव ेकाहमेवहि ॥ अतःपरंप्रवृद्धानांत्रिरात्रमितिनिश्चयः ॥ १५ ॥ वाग्प्रदानेकृतेतत्त्वज्ञेयंचोभयतस्त्र्यहम् ॥
पितुर्वरस्यचततोदत्तानांभर्तुरेवहि ॥ १६ ॥ षण्मासाभ्यंतरेयावद्गर्भस्रावोभवेद्यदि ॥ तदामाससमैस्तासांदिनसैःशुद्धिरिष्यते ॥१७॥
अतऊर्ध्वंस्वजात्युक्तमाशौचंतासुविद्यते ॥ सद्यःशौचंसपिंडानांगर्भस्यपतनेसति ॥ १८ ॥ सर्वेषामेववर्णानांसूतकेमृतकेऽपिवा ॥
दशाहाच्छुद्धिरित्येषकलौशास्त्रस्यनिश्चयः ॥ १९ ॥ आशीर्वादंदेवपूजांप्रत्युत्थानाभिवंदनम् ॥ पर्यंकेशयनंस्पर्शनकुर्यान्मृतसूतके ॥ २० ॥ संध्यादानंजपंहोमंस्वाध्यायंपितृतर्पणम् ॥ ब्रह्मभोज्यंव्रतंनैवकर्तव्यंमृतसूतके ॥ २१ ॥ ॥ ॥ ॥

॥ १८ ॥ सब ए वर्णोंके जन्मसूतक और मृतकसूतकमें दशदिनसे शुद्धि है. कलियुगमें यह शास्त्रका निश्चय है ॥१९॥ आशीर्वाद, देवपूजा, प्रत्युत्थान, नमस्कार, शय्यापर सोना, स्पर्श ए मृतकसूतकमें नहीं करना ॥२०॥ संध्या, दान, जप, होम, वेदपठन, पितृतर्पण, ब्राह्मणभोजन, व्रत एभी मृतसूतकमें नहीं करना ॥ २१ ॥ ॥ ॥ ॥ ॥

नित्यनैमित्तिक और काम्यकर्म जो सूतकमें आचरण करता है उसका पूर्वकृत नित्यादिक कर्म नाश होता है ॥ २२ ॥ चांद्रायणादिमहाव्रत-युक्त ब्रह्मचारी, महामंत्रोंसे पवित्र, अग्निहोत्री, ब्रह्मनिष्ठ ब्राह्मण, संन्यासी, राजा इन्होंके सूतक नहीं है ॥२३॥ विवाह, उत्सव, यज्ञ इन्होंमें मृतसूतक हुवा उसका पूर्वकृत अन्नभोजन करना ए मनुप्रमाण कहा है ॥ २४ ॥ सूतकमें जो अजान दान लेता है उसको दोष नहीं है. देनेवाला दोषको प्राप्त होता है याचकको देनेसे ॥ २५ ॥ जो सूतकको गुप्त करके, ब्राह्मणको अन्न देता है. सूतक जानकरभी जो ब्राह्मण

नित्यंनैमित्तिकंकाम्यंसूतकेयःसमाचरेत् ॥ तस्यपूर्वकृतंनित्यादिकंकर्मविनश्यति ॥ २२ ॥ व्रतिनोमंत्रपूतस्यसाग्निकस्यद्विजस्य च ॥ ब्रह्मनिष्ठस्ययतिनोनहिराज्ञांचसूतकम् ॥ २३ ॥ विवाहोत्सवयज्ञेषुजातेचमृतसूतके ॥ तस्यपूर्वकृतंचान्नंभोज्यंतंमनुरब्रवीत् ॥ २४ ॥ सूतकेयस्तुगृह्णातितदज्ञानान्नदोषभाक् ॥ दातादोषमवाप्नोतियाचकायददन्नपि ॥ २५ ॥ प्रच्छाद्यसूतकंयस्तुददात्यन्नं द्विजायच ॥ ज्ञात्वागृह्णन्तियेविप्रादोषभाजस्तएवहि ॥ २६ ॥ तस्मात्सूतकशुद्ध्यर्थंपितुःकुर्यात्सपिंडनम् ॥ ततःपितृगणैःसार्धंपि तृलोकंसगच्छति ॥ २७ ॥ द्वादशाहेत्रिपक्षेवाषण्मासेवत्सरेऽपिवा ॥ सपिंडीकरणंप्रोक्तंमुनिभिस्तत्त्वदर्शिभिः ॥ २८ ॥ ॥

लेता है वे दोनों दोषभागी हैं ॥ २६ ॥ तिसीसे सूतककी शुद्धिके वास्ते पिताको सपिंडन करे. तिस सपिंडसे वो पिता पितृगणोंके संग पितृलोकमें जाता है ॥ २७ ॥ बारहवें दिन त्रिपक्ष श्राद्धमें, षाण्मासिक श्राद्धमें, सांवत्सर श्राद्धमें, तत्त्वद्रष्टा मुनियोंनें सपिंडीकरण कहा है ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥

हे गरुड़! मैने तो शास्त्रधर्मके अनुसार चारोंही वर्णोंको बारहवें दिन सपिंडन कर्म कहा है ॥ २९ ॥ कारण कलियुगके धर्मोंके अनंतपनासे पुरुषोंके आयुष्यका नाश होनेसे, शरीरकी अस्थिरतासे, बारहवें दिन श्रेष्ठ कहा है ॥ ३० ॥ उपवीत, संस्कार, उत्सवआदि, व्रतको, उद्यापन, विवाहादि, वृद्ध मरे हुवे पर नहीं होते हैं ॥ ३१ ॥ भिक्षुक भिक्षा नहीं लेता है, पितर हंतकार नहीं लेते हैं, नित्यनैमित्तिक कर्म लोप

मयातुप्रोच्यतेतार्क्ष्यशास्त्रधर्मानुसारतः ॥ चतुर्णामेववर्णानांद्वादशाहेसपिंडनं ॥ २९ ॥ आनंत्यात्कलिधर्माणांपुंसांचैवायुषःक्षयात् ॥ अस्थिरत्वाच्छरीरस्यद्वादशाहेप्रशस्यते ॥ ३० ॥ व्रतबंधोत्सवादीनिव्रतस्योद्यापनानिच ॥ विवाहादिर्भवेन्नैवमृतेचगृहमेधिनि ॥ ३१ ॥ भिक्षुर्भिक्षांनगृह्णातिहंतकारोनगृह्यते ॥ नित्यंनैमित्तिकंलुप्येद्यावत्पिंडंनमेलितम् ॥ ३२ ॥ कर्मलोपात्प्रत्यवायीभवेत्तस्मात्सपिंडनं ॥ निरग्निकःसाग्निकोवाद्वादशाहेसमाचरेत् ॥ ३३ ॥ यत्फलंसर्वतीर्थेषुसर्वयज्ञेषुयत्फलम् ॥ तत्फलंसमवाप्नोतिद्वादशाहेसपिंडनात् ॥ ३४ ॥ अतःस्नात्वामृतस्थानेगोमयेनोपलेपिते ॥ शास्त्रोक्तेनविधानेनसपिंडींकारयेत्सुतः ॥ ३५ ॥ ॥ ॥

होता है, जहांतक पिंड नहीं मिलाया जाता है ॥ ३२ ॥ कर्मलोपसे प्रत्यवायी अर्थात् दोषभागी होता है. तिसीसे सपिंडीकर्म निरग्नि वा साग्निकको बारहवें दिन करै ॥ ३३ ॥ जो फल सर्व तीर्थोंमें स्नान करनेसे होता है, सर्व यज्ञ करनेसे जो फल होता है, वो फल बारहवें दिवस सपिंडी करनेसे होता है ॥ ३४ ॥ इसीसे स्नान करके, मरेहुवेके स्थानको गोबरसे लीपके, शास्त्रोक्त विधिसे पुत्र सपिंडीकर्म करै ॥ ३५ ॥

पाद्य, अर्घ्य, आचमन इत्यादिकोंमें विश्वेदेवोंको पूजना, पीछे विकिर पिंड देके, हाथ धोकर, आचमन करना ॥ ३६ ॥ पितामहादिकोंको तीन पिंड देने, अनुक्रमसे वसु, रुद्र, सूर्यरूप और चौथा मृतकका पिंड देना ॥ ३७ ॥ चंदन, तुलसीपत्र, धूप, दीप, नैवेद्य, मुखवास, वस्त्र, दक्षिणा इन्होंसे पूजना ॥३८॥ प्रेतपिंडको तीन प्रकार करके, सुवर्णकी शलाकासे पितामहादि पिंडोंमें न्यारा न्यारा मिलाना ॥३९॥ पितामहीके

पाद्यार्घ्याचमनीयाद्यैर्विश्वेदेवांश्चपूजयेत् ॥ कोपित्रेविकिरंदत्वापुनराचम्यउपस्पृशेत् ॥ ३६ ॥ दद्यात्पितामहादीनांत्रीन्पिंडांश्चयथाक्रमम् ॥ वसुरुद्रार्करूपाणांचतुर्थंमृतकस्यच ॥ ३७ ॥ चंदनैस्तुलसीपत्रैर्धूपैर्दीपैःसुभोजनैः ॥ मुखवासैःसुवस्त्रैश्चदक्षिणाभिश्चपूजयेत् ॥ ३८ ॥ प्रेतपिंडंत्रिधाकृत्वासुवर्णस्यशलाकया ॥ पितामहादिपिंडेषुमेलयेत्तंपृथक्पृथक् ॥ ३९ ॥ पितामह्यासमंमातुःपितामहसमंपितुः ॥ सपिंडीकरणंकुर्यादितिताक्ष्र्यमतंमम ॥ ४० ॥ मृतेपितरियस्याथविद्यतेचपितामहः ॥ तेनदेयास्त्रयःपिंडाःप्रपितामहपूर्वकाः ॥ ४१ ॥ तेभ्यश्चपैतृकंपिंडंमेलयेत्तंत्रिधाकृतम् ॥ मातर्यग्रेप्रशांतायांविद्यतेचपितामही ॥ ४२ ॥ ॥ ॥

पिंडके संग माताके पिंडको मिलाना और पितामहके पिंडके संग पिताको पिंड मिलाना. सपिंडीकरण करना. हे गरुड़! ए हमारा मत है ॥ ४० ॥ जिसका पिता तौ मरजाय और दादा विद्यमान हो उसको प्रपितामहको आदि ले तीन पिंड देने ॥ ४१ ॥ प्रपितामहादिकोंमें तीन प्रकार पिताके पिंडको कर, मिलाना. जो पितामही विद्यमान हो; वा माता अगाड़ी शांत होजाय तौ ॥ ४२ ॥ ॥

माताके श्राद्धमें पिताकीजैसी विधि करना अथवा मेरेमें और महालक्ष्मीमें उन्होंका पिंड मिलाना ॥ ४३ ॥ अपुत्रा स्त्रीके सपिंडनादिक पति करै इस स्त्रीका अपनी शासुआदिकनके संग सपिंडीकरण होता है ॥ ४४ ॥ पति पिता पितामहादिकोंके पिंडके संग, स्त्रीका पिंड देना हे गरुड़ ! ए मेरा मत नहीं है कारण स्त्रीका स्त्रियोंके संग पुरुषोंका पुरुषोंके संग सपिंडी कर्म करना ए हमारा मत है ॥४५॥ हे गरुड़ ! कदाचित् स्त्री पुरुष दोनो एक चितामें दग्ध हुये हों तब सपिंडीकरणके समय तृण बीचमें कर, पुरुषका पिताके संग स्त्रीका शासुआदिके संग सपिंडी

तदामातृकश्राद्धेपिकुर्यात्पैतृकवद्विधिः ॥ यद्वामयिमहालक्ष्म्यांतयोःपिंडंचमेलयेत् ॥ ४३ ॥ अपुत्रायाःस्त्रियाःकुर्यात्पतिःसापिंडनादिकं ॥ श्वश्र्वादिभिःसहैवास्याःसपिंडीकरणंभवेत् ॥ ४४ ॥ भर्त्रादिभिस्त्रिभिःकार्यंसपिंडीकरणंस्त्रियाः ॥ नैतन्ममसतंताक्ष्र्यपत्यासापिंड्यमर्हति ॥ ४५ ॥ एकांचितांसमारूढौदंपतीयदिकाश्यप ॥ तृणमंतरतःकृत्वाश्वशुरादेस्तदाचरेत् ॥ ४६ ॥ एकएवसुतःकुर्यादादौपिंडादिकंपितुः ॥ तदूर्ध्वंचप्रकुर्वीतसत्याःस्नानंपुनश्चरेत् ॥ ४७ ॥ हुताशंयासमारूढादशाहाभ्यंतरेसती ॥ तस्याभर्तुर्दिनेकार्यंशय्यादानंसपिंडनं ॥ ४८ ॥ कृत्वासपिंडनंताक्ष्र्यप्रकुर्यात्पितृतर्पणम् ॥ उदाहरेत्स्वधाकारंवेदमंत्रैःसमन्वितं ॥ ४९ ॥ ॥

कर्म करना ॥ ४६ ॥ पुत्र प्रथमतौ पिताके पिंडादिक करै उसके पीछे वही पुत्र स्नान करके, सतीका सपिंडन करै ॥४७॥ जो सती पतिके दशदिनके भीतर चितामें दग्ध होती है उसकाही भर्ताके सपिंडीके दिनमें शय्यादान और सपिंडन करना ॥ ४८ ॥ हे गरुड़ ! इस विधिसे सपिंडन करके, पितृतर्पण करना. वेदमंत्रोंसे स्वधाकारउच्चारण करना ॥ ४९ ॥ ॥ ॥ ॥

पीछे अभ्यागत ब्राह्मणका भोजन कराना हंतकार सदा बोलना उस हंतकारसे पितर, देव, मुनि, दानव ए सब प्रसन्न होते हैं ॥५०॥ एक ग्रासकी भिक्षा होती है चार ग्रासका पुष्कल होता है, चार पुष्कलोंको हंतकार कहा है ॥ ५१ ॥ सपिंडीकर्ममें ब्राह्मणके चरणोंको चंदन, अक्षतोंसे पूजना उसको अक्षय तृप्तिके लिये दान देना ॥ ५२ ॥ वर्षभरकी जीविका, घृत, अन्न, सुवर्ण, चांदी, सुशीला गौ, घोड़ा, हाथी, रथ, पृथ्वी

अतिथिंभोजयेत्पश्चाद्धंतकारंचसर्वदा ॥ तेनतृप्यंतिपितरोमुनयोदेवदानवाः ॥ ५० ॥ ग्रासमात्राभवेद्भिक्षाचतुर्ग्रासंतुपुष्कलं ॥ पुष्कलानिचचत्वारिहंतकारोविधीयते ॥ ५१ ॥ सपिंड्यांविप्रचरणौपूजयेच्चंदनाक्षतैः ॥ दानंतस्मैप्रदातव्यमक्षय्यंतृप्तिहेतवे ॥ ५२ ॥ वर्षवृत्तिंघृतंचान्नंसुवर्णंरजतंसुगाम् ॥ अश्वंगजंरथंभूमिमाचार्यायप्रदापयेत् ॥ ५३ ॥ ततश्चपूजयेन्मंत्रैःस्वस्तिवाचनपूर्वकं ॥ कुंकुमाक्षतनैवेद्यैर्ग्रहान्देवींविनायकं ॥ ५४ ॥ आचार्यस्तुततःकुर्यादभिषेकंसमंत्रकम् ॥ बद्ध्वासूत्रंकरेदद्यान्मंत्रपूतांस्तथाक्षतान् ॥ ५५ ॥ ततश्चभोजयेद्विप्रान्मिष्टान्नैर्विविधैःशुभैः ॥ दद्यात्सदक्षिणांस्तेभ्यःसजलान्नान्द्विषद्घटान् ॥ ५६ ॥ ॥

ए आचार्यको देने ॥ ५३ ॥ पीछे मंत्रोंसे स्वस्तिवाचनपूर्वक कुंकुम, अक्षत, नैवेद्य इन्होंसे ग्रह, देवी, गणेश इन्होंको पूजना ॥५४॥ आचार्य पीछे मंत्रसहित अभिषेक करै. हाथमें सूत्र बांधकर, मंत्रसे पवित्र अक्षत देवै ॥ ५५ ॥ पीछे नानाप्रकारके सुंदर मिष्टान्नोंसे ब्राह्मणभोजन कराना, दक्षिणासहित उन ब्राह्मणोंको बारह घट जलअन्नसहित देना ॥ ५६ ॥ ॥ ॥ ॥

जल, शस्त्र, प्रत्यंचा, दंड ए ब्राह्मणभोजनसे पीछे अनुक्रमसे ब्राह्मणादि वर्णोंसे स्पर्श करने. जैसे कि– ब्राह्मण जल, क्षत्रिय शस्त्र, वैश्य प्रत्यंचा, शूद्र दंडको स्पर्श करै ॥ ५७ ॥ ऐसे सपिंडन करके, क्रियाके वस्त्रोंको त्यागना. स्वच्छ सपेद वस्त्र पहरके, शय्यादान देना ॥५८॥ शय्यादानको इंद्रसहित सर्वदेवता सराहते हैं तिसीसे मरेपीछे अथवा जीवता हुवा शय्यादान देना ॥ ५९ ॥ सो शय्या सारके काठकी रमणीक सुंदर चित्रविचित्र जड़ीहुई रेस्मी डोरियोंसे बिनीहुई, सुवर्णके पत्तोंसे जड़ित ॥ ६० ॥ हंसजैसी स्वच्छ, उज्वल, कोमल प्रच्छादनव-

वार्यायुधप्रतोदस्तुदंडस्तुद्विजभोजनात् ॥ स्प्रष्टव्यानंतरंवर्णैःशुद्ध्येरंस्तेततःक्रमात् ॥ ५७ ॥ एवंसपिंडनंकृत्वाक्रियावस्त्राणिसंत्यजेत् ॥ शुक्लांबरधरोभूत्वाशय्यादानंप्रदापयेत् ॥ ५८ ॥ शय्यादानंप्रशंसंतिसर्वेदेवाःसवासवाः ॥ तस्माच्छय्याप्रदातव्यामरणेजीवितेपिवा ॥ ५९ ॥ सारदारुमयींरम्यांसुचित्रैश्चित्रितांदृढाम् ॥ पट्टसूत्रैर्विततनितांहेमपत्रैरलंकृताम् ॥ ६० ॥ हंसतूलीप्रतिच्छन्नांशुभशीर्षोपधानिकाम् ॥ प्रच्छादनपटीयुक्तांपुष्पगंधैःसुवासिताम् ॥ ६१ ॥ दिव्यबंधैःसुबद्धांचसुविशालांसुखप्रदां ॥ शय्यामेवंविधांकृत्वाह्यास्तृतायांन्यसेद्भुवि ॥ ६२ ॥ छत्रंदीपालयंरौप्यंचामरासनभाजनम् ॥ भृंगारकारकादर्शपंचवर्णवितानकम् ॥ ६३ ॥

स्त्रसे संयुक्त, सुंदर शीर्षोपधानिक अर्थात् तकिया जिसपर, ऊपर सुंदर ढकनेंको वस्त्र, पुष्प, अतर अर्गजासे सुगंधित, ॥ ६१ ॥ दिव्य बंधनोंसे बंधी, बड़ी चौंड़ी, सुख देनेवाली ऐसी शय्या कराके, जाजमबिछी हुई पृथ्वीपर स्थापित करना ॥ ६२ ॥ छत्ररूपाको दीपक, चामर, आसन, पात्र, गडुई, कलश, काच ए सामग्री धरके, ऊपर पंचरंग चंदवा बांधना ॥ ६३ ॥ ॥ ॥ ॥

औरभी जो कुछ शय्याकी सामग्री हो वह समग्र उस शय्याके चौतरफ स्थापित करना ॥ ६४ ॥ उसपर सुवर्णके लक्ष्मीजीसहित हरिको स्थापित करने. कैसे कि– हरि संपूर्ण आभूषण और शस्त्र तथा वस्त्रोंसे संयुक्त ॥ ६५ ॥ और सौभाग्यवंती स्त्रियोंकी शय्या हो तौ कज्जल, ममहाउर, कुंकुम, वस्त्र, आभूषण ए संपूर्ण देने ॥ ६६ ॥ पीछे स्त्रीसहित ब्राह्मणको गंधपुष्पोंसे शोभित कर, कुंडल अँगूठीआदि आभूषणोंसे,

शयनस्थभवेत्किंचिद्यच्चान्यदुपकारकम् ॥ तत्सर्वंपरितस्तस्याःस्वेस्वेस्थानेनियोजयेत् ॥ ६४ ॥ तस्यांसंस्थापयेद्धैमंहरिंलक्ष्मीसमन्वितम् ॥ सर्वाभरणसंयुक्तमायुधांबरसंयुतं ॥ ६५ ॥ स्त्रीणांचशयनेधृत्वाकज्जलालक्तकुंकुमम् ॥ वस्त्रंभूषादिकंयच्चसर्वमेवप्रदापयेत् ॥ ६६ ॥ ततोविप्रंसपत्नीकंगंधपुष्पैरलंकृतम् ॥ कर्णांगुलीयाभरणैःकंठसूत्रैश्चकांचनैः ॥ ६७ ॥ उष्णीषमुत्तरीयंचचोलकंपरिधायच ॥ स्थापयेत्सुखशय्यायांलक्ष्मीनारायणाग्रतः ॥ ६८ ॥ कुंकुमैःपुष्पमालाभिर्हरिंलक्ष्मींसमर्चयेत् ॥ पूजयेल्लोकपालांश्चग्रहान्देवींविनायकम् ॥ ६९ ॥ उत्तराभिमुखोभूत्वागृहीत्वाकुसुमांजलिम् ॥ उच्चारयेदिमंमंत्रंविप्रस्यपुरतःस्थितः ॥ ७० ॥ ॥

सुवर्णके कंठसूत्रसे शोभित करना ॥ ६७ ॥ पाग, डुपट्टा, अंगरखा पहराय, सुखशय्यापर लक्ष्मीनारायणके अगाड़ी स्थापित करने ॥ ६८ ॥ कुंकुम और पुष्पोंकी मालासे हरि और लक्ष्मीजीको पूजना तथा लोकपाल, ग्रह, देवी, विनायक इन्होंको पूजन करना ॥ ६९ ॥ उत्तरके तरफ मुख करके, पुष्पांजली लेकर, ब्राह्मणके अगाड़ी स्थित हो, ए मंत्रउच्चारण करै ॥ ७० ॥ ॥ ॥ ॥

हे कृष्ण! जैसे आपकी क्षीरसमुद्रमें शय्या है तैसे मेरी ए जन्म ... में अशून्य हो ॥ ७१ ॥ ऐसें पुष्पांजलि ब्राह्मण और हरिकी प्रतिमाको देना. पीछे सब सामग्रीसहित संकल्पसे शय्यादान देना ॥ ७२ ॥ व्रतको उपदेश करनेवाला वेदवादी गुरू हो उसको देना, हे ब्राह्मण! इसको ग्रहण करो ऐसे कहकर, कौन देताहै ऐसा बोलना ॥ ७३ ॥ शय्यापर स्थित ऐसा ब्राह्मण लक्ष्मी, हरि इन्होंको आन्दोलन करना. पीछे प्रदक्षिणा कर-

यथाकृष्णत्वदीयास्तिशय्याक्षीरोदसागरे ॥ तथाभूयादशून्ये ,ममजन्मनिजन्मनि ॥ ७१ ॥ एवंपुष्पांजलिंविप्रेप्रतिमायां हरेःक्षिपेत् ॥ ततःसोपस्करंशय्यादानंसंकल्पपूर्वकम् ॥ ७२ ॥ दद्याद्व्रतोपदेष्टृचगुरवेब्रह्मवादिने ॥ गृहाणब्राह्मणैनांत्वंको ददातीतिकीर्तयन् ॥ ७३ ॥ आंदोलयेद्द्विजंलक्ष्मींहरिंचशयनेस्थितम् ॥ ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत् ॥ ७४ ॥ सर्वोपस्करणैर्युक्तंप्रदद्यादतिसुंदरम् ॥ शय्यायांसुखसुप्त्यर्थंगृहंचविभवेसति ॥ ७५ ॥ जीवमानःस्वहस्तेनयदिशय्यांद दातियः ॥ तज्जीवतावृषोत्सर्गंपर्वणीषुसमाचरेत् ॥ ७६ ॥ इयमेकस्यदातव्याबहूनांनकदाचन ॥ साविभक्ताचविक्री तादातारंपातयत्यधः ॥ ७७ ॥ ॥ ॥ ॥ ॥

के, नमस्कार करके, संकल्पसे देना ॥ ७४ ॥ सर्ववस्तुवोंसे सहित सुखसे निद्रा करनेके वास्ते शय्या, अत्यंतसुंदर घरदान, वैभव हो तौ देना ॥ ७५ ॥ जो जीवता हुवा अपने हाथसे शय्यादान देताहै वो जीवताहुवा शय्यादान पर्वोंमें आचरण करना ॥ ७६ ॥ यह शय्या एकको देना बहोतोंको कभी नहीं देना. वह शय्या विभाग हुई और विक्रीभई देनेवालेको नरकमें डालती है ॥ ७७ ॥ ॥ ॥

सुपात्रको शय्या देनेसे मनोवांछित फलको प्राप्त होताहै. पिता और पुत्र परलोकमें और इसलोकमें आनंद भोगतेहैं पुरंदरके दिव्य घरमें अथवा सूर्यपुत्रके घरमें ॥ ७८ ॥ प्राप्त होताहै. शय्यादानके प्रभावसे इसमें संदेह नहीं ॥ ७९ ॥ श्रेष्ठ विमानपर बैठकर, अप्सरोंके समूहसे सेवित हुवा जहांतक महाप्रलय हो तहांतक रोगरहितहुवा स्थित रहताहै ॥ ८० ॥ सर्व तीर्थोंमें स्नान करनेसे जो पुण्य होताहै, सर्व पर्वदिनोंमें दा-

पात्रेप्रदायशयनंवांछितंफलमाप्नुयात् ॥ पिताचदातातनयःपरत्रेहचमोदते ॥ पुरंदरगृहेदिव्येसूर्यपुत्रालयेपिच ॥ ७८ ॥ उपतिष्ठेन्नसंदेहःशय्यादानप्रभावतः ॥ ७९ ॥ विमानवरमारूढःसेव्यमानोऽप्सरोगणैः ॥ आभूतसंप्लवंयावत्तिष्ठत्यातंकवर्जितः ॥ ८० ॥ सर्वतीर्थेषुयत्पुण्यंसर्वपर्वदिनेषुच ॥ तेभ्यश्चाप्यधिकंपुण्यंशय्यादानोद्भवंभवेत् ॥ ८१ ॥ एवंदत्वासुतःशय्यांपददानंप्रदापयेत् ॥ तच्छृणुष्वमयाख्यातंयथावत्कथयामिते ॥ ८२ ॥ छत्रोपानहवस्त्राणिमुद्रिकाचकमंडलुः ॥ आसनंपंचपात्राणिपदंपंचविधंस्मृतम् ॥ ८३ ॥ दंडेनताम्रपात्रेणह्यामान्नैर्भोजनैरपि ॥ अर्घ्ययज्ञोपवीतैश्चपदंसंपूर्णतांव्रजेत् ॥ ८४ ॥ ॥ ॥

नदेनेंसे जो पुण्यहोताहै, उससे अधिक पुण्य शय्यादानका होताहै ॥ ८१ ॥ ऐसे पुत्र शय्या देकर, पददान देवै सो मेरा कहा सुनों मैं तुमको यथार्थ कहताहूं ॥ ८२ ॥ छत्र, पगरखी, वस्त्र, मुद्रिका, कमंडलु, आसन, पंचपात्र, ॥ ८३ ॥ दंड, ताम्रपात्र, आमान्न, भोजन, अर्घ्य, यज्ञोपवीत ए तेरह वस्तुवोंसे पददान संपूर्ण होताहै ॥ ८४ ॥ ॥ ॥ ॥ ॥

ऐसी विधिसे तेरह पद यथाशक्ति करके, तेरह ब्राह्मणोंको बारहवें दिन देने ॥ ८५ ॥ इस पददानसे धर्मात्मा श्रेष्ठ गतिको प्राप्त होताहै और यममार्गमें गये हुवेको पददान सुख देताहै ॥ ८६ ॥ वहां सूर्यताप बड़ा भयंकर है जिससे मनुष्य दग्ध होताहै और यहां जो छत्रदान देताहै उसके मस्तकपर सुंदर छाया होतीहै ॥ ८७ ॥ अत्यंत संकटोंसे व्याप्त ऐसा यमलोकका मार्ग है जो यहां पगरखी, देतेहैं वे घोड़ेपर

त्रयोदशपदानीत्थंयथाशक्त्याविधायच ॥ त्रयोदशेभ्योविप्रेभ्यःप्रदद्याद्द्वादशेहनि ॥ ८५ ॥ अनेनपददानेनधार्मिकायांतिसद्गतिं ॥ यममार्गगतानांचपददानंसुखप्रदं ॥ ८६ ॥ आतपस्तत्रवैरौद्रोदह्यतेयेनमानवः ॥ छत्रदानेनसुच्छायाजायतेतस्यमूर्धनि ॥ ८७ ॥ अतिसंकटसंकीर्णेयमलोकस्यवर्त्मनि ॥ अश्वारूढाश्चतेयांतिददतेयद्युपानहौ ॥ ८८ ॥ शीतोष्णवातदुःखानितत्रघोराणिखेचर ॥ वस्त्रदानप्रभावेणसुखंनिस्तरतेपथि ॥ ८९ ॥ यमदूतामहारौद्राःकरालाःकृष्णपिंगलाः ॥ नपीडयंतितंमार्गेमुद्रिकायाःप्रदानतः ॥ ९० ॥ बहुधर्मसमाकीर्णेनिर्वातेतोयवर्जिते ॥ कमंडलुप्रदानेनतृषितःपिबतेजलं ॥ ९१ ॥ मृतोद्देशेनयोदद्यादुदपात्रंचताम्रजं ॥ प्रपादान सहस्रस्ययत्फलंसोऽश्नुतेध्रुवं ॥ ९२ ॥ ॥ ॥ ॥ ॥

बैठे जातेहैं ॥ ८८ ॥ हे गरुड़! शीत, उष्ण, वायु ए घोर दुःख वहां है. वस्त्रदानके प्रभावसे इन्होंको सुखसे तिरताहै ॥ ८९ ॥ यमके दूत बड़े भयंकर, विकराल, काले, पीले उसको मार्गमें नहीं पीड़ा देतेहैं जो मुद्रिकादान देताहै ॥ ९० ॥ बहोत घामसे व्याप्त, निर्वात, जलरहित ऐसे मार्गमें कमंडलुके देनेसे तृषायुक्त हुवा जल पीताहै ॥ ९१ ॥ जो मृतकके उपदेशसे ताम्रका जलपात्र देताहै उसको हजार पानीय-

शालादान देनेका जो फल है वो निश्चय प्राप्त होता है ॥ ९२ ॥ आसन पात्र ए विधिसे ब्राह्मणको दियाहुवा सुखकरके, परलोकमें भोग्य भोगता है. मार्गमें शनैःशनैः जाताहै ॥ ९३ ॥ ऐसे सपिंडनदिनमें विधिसे दान देकर, बहोत ब्राह्मण भोजन कराने और चांडालादिकोंकोभी देना ॥ ९४ ॥ पीछे सपिंडनके उपरांत वर्षतक प्रतिमास पिंडसहित जलकलश देना ॥ ९५ ॥ हे गरुड़! प्रेतकार्यके बिगर करे हुवेको करना नहीं है. प्रेतके लिये अक्षय तृप्तिके वास्ते वारंवार करना ॥ ९६ ॥ अब मासिक श्राद्धका और आब्दिक श्राद्धका विशेष कहता हूं

आसनेभोजनेचैवदत्तेसम्यग्द्विजातये ॥ सुखेनभुंक्तेपाथेयंपथिगच्छन्शनैःशनैः ॥ ९३ ॥ एवंसपिंडनदिनेदत्वादानंविधानतः ॥ बहून्संभोजयेद्विप्रान्यःश्वपाकादिकानपि ॥ ९४ ॥ ततःसपिंडनादूर्ध्वमर्वाक्संवत्सरादपि ॥ प्रतिमासंप्रदातव्योजलकुंभःसपिंडकः ॥ ९५ ॥ कृतस्यकरणंनास्तिप्रेतकार्यादृतेखग ॥ प्रेतार्थंतुपुनःकुर्यादक्षय्यतृप्तिहेतवे ॥ ९६ ॥ अतोविशेषंवक्ष्यामिमासिकस्याब्दिकस्यच ॥ पाक्षिकस्यविशेषंचविशेषतिथिषुमृते ॥९७॥ पौर्णमास्यांमृतोयस्तुचतुर्थीतस्यऊनिका ॥ चतुर्थ्यांतुमृतोयस्तुनवमीतस्यऊनिका ॥ ९८ ॥ नवम्यांतुमृतोयस्तुरिक्तातस्यचतुर्दशी ॥ इत्येवंपाक्षिकंश्राद्धंकुर्याद्विंशतिमेदिने ॥ ९९ ॥ ॥

और प्रथम पाक्षिक श्राद्धकी विशेषता पौर्णमास्यादि तिथियोंमें मरे हुवे पुरुषकी विधि कहता हूं ॥ ९७ ॥ पौर्णमासीको जो मरता है उसकी अमावस्याके अगाड़ीकी चतुर्थी ऊनिका अर्थात् पाक्षिक श्राद्धतिथि है और जो चतुर्थीको मरता है उसकी दुसरी चतुर्थी वाद नवमी ऊनिका है ॥ ९८ ॥ और नवमीको जो मरता है उसकी दुसरी नवमी वाद चतुर्दशी ऊनिका तिथि है. ऐसे बीशवें दिन पाक्षिकश्राद्ध करना ॥ ९९ ॥

अब मासिक श्राद्धकीभी अधिक विधि कहते हैं. जो एकही मासमें दो संक्रांति संयुक्त हों उसको क्षयमास कहते हैं, जिसमें संक्रांति नहीं हो उसको मलमास कहते हैं, जो कार्तिक और मार्गशीर्ष क्षयमास हो तो तब कार्तिक मार्गशीर्षमें व्रत श्राद्धादिक जिस पक्षमें जिस-तिथिमें जिस अपराह्णआदि कालमें कहा है वे क्षयमासमें तहां तहां करना अर्थात् कार्तिक क्षय हो तो मार्गशीर्षमें करना, मार्गशीर्ष क्षय हों तो पौषमें करना ॥ १०० ॥ अब एक मासमें दो महीना हों उसका निर्धार कहते हैं. जो एकमासमें दो महीना हों

एकएव यदामासःसंक्रांतिद्वयसंयुतः ॥ मासद्वयगतंश्राद्धंमलमासेहिशस्यते ॥ १०० ॥ एकस्मिन्मासिमासौद्वौयदिस्यातांतरद्वयोः ॥ तावेवपक्षौताएवतिथयस्त्रिंशदेवहि ॥ १ ॥ तिथ्यर्धेप्रथमेपूर्वोद्वितीयेऽर्धेतदुत्तरः ॥ मासावितिबुधैश्चिंत्यौमलमासस्यमध्यगौ ॥ २ ॥ असंक्रांतेचकर्तव्यंसपिंडीकरणंखग ॥ तथैवमासिकंश्राद्धंवार्षिकंप्रथमंतथा ॥ ३ ॥ ॥

तो दोनो मासोंकी पंद्रह तिथिही तीस तिथी जाननी ॥ १ ॥ और जो अधिक मासमें मरजाय तौ उसका मासिक वार्षिक श्राद्ध तिथिके पूर्वार्द्धमें मरा होयतो कृष्णपक्षमें करना और तिथिके उत्तरार्द्धमैं मरा हो तो शुक्लपक्षमें करना परंतु तिथितौ मृत्यु-हो सोई दिन लेना ॥ २ ॥ हे गरुड़! मलमासमें मरेहुएको सपिंडीकरण बारहवें दिन करना. तैसेही मासिकश्राद्ध और वार्षिक श्राद्ध प्रथमही करना ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥

वर्षके मध्यमें जो अधिक मास हो तौ तेरहवें महीनेमें प्रेतकी प्रथम वर्षकी क्रिया करनी ॥ ४ ॥ असंक्रांतिमासमें पिंडविना श्राद्ध करना, संक्रांति हो उसमें पिंडसहित करना. ऐसे वर्ष वर्ष प्रति मलमासमें श्राद्धदिनकी वंध्यत्वनिवृत्तिके लिये पिताके उद्देशसे ब्राह्मणभोजन कराय, शुद्धमासमें सपिंडन श्राद्ध करना ॥ ५ ॥ ऐसे वर्ष पूरा हुवा तब वार्षिकश्राद्ध करना. उस वार्षिकमें ज्यादा ब्राह्मणभोजन कराने ॥ ६ ॥ वर्षके उपरांत श्राद्धमें सदाही तीन पिंड करने. एकोदिष्ट वर्ष पीछे नहीं करना उससे पितृघातक होता है ॥ ७ ॥ पितृसंबंधी

संवत्सरस्यमध्येतुयदिस्यादधिमासकः ॥ तदात्रयोदशेमासिक्रियाप्रेतस्यवार्षिकी ॥ ४ ॥ पिंडवर्ज्यमसंक्रांतेसंक्रांतेपिंडसंयुतम् ॥
प्रतिसंवत्सरंश्राद्धमेवंमासद्वयेपिच ॥ ५ ॥ एवंसंवत्सरेपूर्णेवार्षिकंश्राद्धमाचरेत् ॥ तस्मिन्नपिविशेषेणभोजनीयाद्विजातयः ॥ ६ ॥
कुर्यात्संवत्सरादूर्ध्वंश्राद्धेपिंडत्रयंसदा ॥ एकोद्दिष्टंनकर्तव्यंतेनस्यात्पितृघातकः ॥ ७ ॥ तीर्थश्राद्धंगयाश्राद्धंगजच्छायंचपैतृकम् ॥
अब्दमध्येनकुर्वीतग्रहणेनयुगादिषु ॥ ८ ॥ यदापुत्रेणवैकार्यंगयाश्राद्धंखगेश्वर ॥ तदासंवत्सरादूर्ध्वंकर्तव्यंपितृभक्तितः ॥ ९ ॥
गयाश्राद्धात्प्रमुच्यंतेपितरोभवसागरात् ॥ गदाधरानुग्रहेणतेयांतिपरमांगतिम् ॥ १० ॥ ॥ ॥

तीर्थश्राद्ध, गयाश्राद्ध, गजछायाश्राद्ध ए वर्षके मध्यमें नहीं करना. युगादि श्राद्धभी नहीं करना ॥ ८ ॥ हे गरुड़! जो पुत्र गयाश्राद्ध करै तौ पितृश्वरोंकी भक्तिके वास्ते वर्षके उपरांत करना ॥ ९ ॥ गयाश्राद्धसे पितृश्वर संसारसागरसे छूटकर, गदाधर भगवानकी अनुग्रहसे परमगतिको प्राप्त होते हैं ॥ १० ॥ ॥ ॥ ॥ ॥

तुलसीकी मंजरीसे विष्णुकी पादुका पूजनी. उसके लवादि तीर्थोंमें दश पिंड देने अनुक्रमसे ॥ ११ ॥ सात गोत्रोंको और एकसो एक कुल उद्धार करता है. जो शमीपत्रप्रमाण पिंड गयाशिरपर देता है ॥ १२ ॥ गयापर प्राप्त होकर, जो कुलको आनंदकारी पुत्र श्राद्ध करता है उसका पितृश्वरोंको प्रसन्नता देनेवाला वोह जन्म सफल होता है ॥ १३ ॥ अहो गरुड ! पितृश्वरोंकी गाईभई पूर्वकथा सुननेंमें आती है सो सुनो. हिमालयके पार्श्ववर्ती कलापग्रामके उपवनमें मनु. पुत्र इक्ष्वाकु राजाकी देवतोंकरके गाई ॥ १४ ॥ अहो ! हमारे कुलमें वे सन्मार्ग-

तुलसीमंजरीभिश्चपूजयेद्विष्णुपादुकाम् ॥ तस्यालवादितीर्थेषुपिंडान्दद्याद्यथाक्रमम् ॥ ११ ॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं ॥ शमीपत्रप्रमाणेनपिंडंदद्याद्गयाशिरे ॥ १२ ॥ गयामुपेत्ययःश्राद्धंकरोतिकुलनंदनः ॥ सफलंतस्यतज्जन्मजायतेपितृतुष्टिदम् ॥१३॥ श्रूयतेचापिपितृभिर्गीतागाथाखगेश्वर ॥ इक्ष्वाकोर्मनुपुत्रस्यकलापोपवनेसुरैः ॥१४॥ अपिनस्तेभविष्यंतिकुलेसन्मार्गशीलिनः ॥ गयामुपेत्ययेपिंडान्दास्यंत्यस्माकमादरात् ॥ १५ ॥ एवमायुष्मिकींताक्ष्र्ययःकरोतिक्रियांसुतः ॥ सस्यात्सुखीभवेन्मुक्तः कौशिकस्यात्मजायथा ॥ १६ ॥ भरद्वाजात्मजाःसप्तभुक्त्वाजन्मपरंपरां ॥ कृत्वापिगोवधंताक्ष्र्यमुक्ताःपितृप्रसादतः ॥ १७ ॥ ॥

शील होयगे कि- जो गयामें जाकर, हमारेको आदरसे पिंड देवें ॥ १५ ॥ ऐसे हे गरुड ! जो पुत्र क्रिया करता है वोह सुखी होता है और मुक्त होता है जैसे कौशिकमुनिके पुत्र हुये तैसे ॥ १६ ॥ भरद्वाजके सात पुत्र जन्मपरंपरा भोगके, गोवधभी करके, हे गरुड ! पितृश्वरोंकी कृपासे मोक्ष पातेभये ॥ १७ ॥ ॥ ॥ ॥ ॥

दशार्णदेशमें सात व्याध, कालंजरपर्वतमें मृगा, शरद्वीपमें चकवा, मानससरोवरमें हंस ॥१८॥ ए कहेहुये पितृभक्तिसे कुरुक्षेत्रमें वेदपारगामी ब्राह्मण होतेभये पीछे समग्र ब्राह्मणके पुत्र मुक्तिको प्राप्त होतेभये ॥१९॥ तिसीसे सब यत्नसे मनुष्य पितृभक्त होवे क्यों कि इसलोक और परलोकमें पितृभक्तिसे सुखी होता है ॥ २० ॥ हे गरुड़! संपूर्ण और्ध्वदेहिक मैने तुमको कहा है. जो पुत्रकी वांछा देनेवाला, पवित्र और

सप्तव्याधादशार्णेषुमृगाःकालंजिरेगिरौ ॥ चक्रवाकाःशरद्वीपेहंसाःसरसिमानसे ॥ १८ ॥ तेपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः ॥ पितृभक्त्याचतेसर्वेगतामुक्तिंद्विजात्मजाः ॥ १९ ॥ तस्मात्सर्वप्रयत्नेनपितृभक्तोभवेन्नरः ॥ इहलोकेपरेवापिपितृभक्त्यासुखीभवेत् ॥ २० ॥ एतत्तार्क्ष्यमयाख्यातंसर्वमेवौर्ध्वदेहिकम् ॥ पुत्रवांछाप्रदंपुण्यंपितुर्मुक्तिप्रदायकम् ॥ २१ ॥ निर्धनोपिनरःकश्चिद्यःशृणोतिकथामिमाम् ॥ सोपिपापविनिर्मुक्तोदानस्यफलमाप्नुयात् ॥२२॥ विधिनाकुरुतेयस्तुश्राद्धंदानेमयोदितं ॥ शृणुयाद्गारुडंचापिशृणुतस्यापियत्फलम् ॥ २३ ॥ पितादादातिसत्पुत्रान्गोधनानिपितामहः ॥ धनदाताभवेत्सोऽपियस्तस्यप्रपितामहः ॥ २४ ॥ ॥ ॥ ॥ ॥

पितृश्वरोंको मुक्ति देनेवाला है ॥ २१ ॥ निर्धनभी जो मनुष्य इस कथाको सुनै वोहभी पापोंसे छूटके, दानके फलको प्राप्त होता है ॥ २२॥ विधिसे मेरा कह्या श्राद्धदान जो करता है और गरुडपुराण सुनता है उसको जो फल है सो सुनो ॥ २३ ॥ उसको पिता श्रेष्ठ पुत्रोंको देता है, दादा गोधन देता है और परदादा धन देता है ॥ २४ ॥ ॥ ॥ ॥ ॥

पुष्ट अन्नादिक वृद्ध प्रपितामह देताहै वे सर्व श्राद्धसे तृप्त हुवे पुत्रकी वांछा देकर ॥ २५ ॥ धर्ममार्गसे धर्मराजके मंदिरमें जातेहैं. वहां धर्मसभामें वे परमआदरसे स्थित रहतेहैं ॥ २६ ॥ सूतजी कहतेहैं—ऐसे श्रीविष्णुसे उक्त ऊर्ध्वदानको अनंत माहात्म्य सुनके, गरुड़ हर्षको प्राप्त होते भये ॥ २७ ॥ इति श्रीसारोद्धारे गरुडपुराणे ज्ञानबोधिनीभाषाटीकायां सपिंडनादिकर्मनिरूपणं नाम त्रयोद-

दद्याद्विपुलमन्नाद्यंवृद्धस्तुप्रपितामहः ॥ तृप्ताःश्राद्धेनतेसर्वेदत्वापुत्रस्यवांछितम् ॥ २५ ॥ गच्छंतिधर्ममार्गैश्चधर्मराजस्यमन्दिरम् ॥ तत्रधर्मसभायांतेतिष्ठंतिपरमादरात् ॥ २६ ॥ सूतउवाच ॥ एवंश्रीविष्णुनाप्रोक्तमौर्ध्वदानसमुद्भवम् ॥ श्रुत्वामाहात्म्यमतुलंगरुडोहर्षमागतः ॥ २७ ॥ इतिश्रीगरुडपुराणेसारोद्धारेसपिंडनादिसर्वकर्मनिरूपणंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ गरुडउवाच ॥ यमलोकःकियन्मात्रःकीदृशःकेननिर्मितः ॥ सभाचकीदृशीतस्यांधर्मआस्तेचकैःसह ॥ १ ॥ येधर्ममार्गैर्गच्छंतिधार्मिकाधर्ममन्दिरम् ॥ तान्धर्मानपिमार्गांश्चममाख्याहिदयानिधे ॥ २ ॥ ॥ ॥ ॥

शोऽध्यायः ॥ १३ ॥ गरुड़जी पूंछतेहैं कि—यमलोक कैसा है? कितना बड़ा है? कौनने उसको रचा है? वह सभा कैसी है? उस सभामें धर्म किन्होंके संग बैठतेहैं? ॥ १ ॥ जो धर्मात्मा धर्ममार्गसे धर्मराजके मंदिरमैं जातेहैं उन धर्मोंको तथा धर्ममार्गोंको हे दयानिधे! आप हमारेको कहो ॥ २ ॥ ॥ ॥ ॥ ॥

अब श्रीभगवान कहतेहैं— हे गरुड़! सुनो. जो नारदादि मुनियोंसे जाननेमें आवै ऐसा धर्मराजका दिव्य नगर है. वो महा पुण्यवानको प्राप्त होताहै ॥ ३ ॥ जो दक्षिण और नैऋत्यके मध्यमें वैवस्वतको नगर है वो समग्र वज्रमणिमयी है. देवदानवोंसे अभेद्य है ॥ ४ ॥ चार दरवाजे हैं, चौकोन है, उच्च रकबासे वेष्टित है, हजार योजन प्रमाणसे कह्याहै ॥ ५ ॥ उस पुरमें सुंदर चित्रगुप्तको मंदिर है. पच्चीस संख्या योजनोंसे

श्रीभगवानुवाच ॥ शृणुतार्क्ष्यप्रवक्ष्यामियद्रम्यंनारदादिभिः ॥ तद्धर्मनगरंदिव्यंमहापुण्यैरवाप्यते ॥ ३ ॥ याम्यनैर्ऋतयोर्मध्येपुरंवैवस्वतस्ययत् ॥ सर्ववज्रमयंदिव्यमभेद्यंतत्सुरासुरैः ॥ ४ ॥ चतुरस्रंचतुर्द्वारमुच्चप्राकारवेष्टितम् ॥ योजनानांसहस्रंहिप्रमाणेनतदुच्यते ॥ ५ ॥ तस्मिन्पुरेऽस्तिसुभगंचित्रगुप्तस्यमन्दिरम् ॥ पंचविंशतिसंख्याकैर्योजनैर्विस्तृतायतम् ॥ ६ ॥ दशोच्छ्रितंमहादिव्यंलोहप्राकारवेष्टितम् ॥ प्रतोलीशतसंचारंपताकाध्वजभूषितम् ॥ ७ ॥ विमानगणसंकीर्णंगीतवादित्रनादितम् ॥ चित्रितंचित्रकुशलैर्निर्मितंदेवशिल्पिभिः ॥ ८ ॥ उद्यानोपवनैरम्यंनानाविहगकूजितं ॥ गंधर्वैरप्सरोभिश्चसमंतात्परिवारितम् ॥ ९ ॥ ॥ ॥ ॥ ॥

लंबा चौंड़ा है ॥ ६ ॥ दश योजन उंचा है, महान् दिव्य है; लोहाके परकोटसे वेष्टित है, शैकड़ों बन्दनवार, ध्वजा पताकावोंसे शोभित है ॥ ७ ॥ विमानोंके समूहसे व्याप्त हो रहाहै. गीत और बाजोंसे सुंदर नादित है, श्रेष्ठ चित्रोंसे चित्रित है, विश्वकर्माआदिकोंसे रचा गयाहै ॥ ८ ॥ बगीचा उपवनोंसे रमणीक है नानाप्रकारके पक्षियोंसे शब्दायमान है. गंधर्व अप्सरोंसे चहूंतरफसे सेवित है ॥ ९ ॥ ॥ ॥

उस सभामें चित्रगुप्त अपने परम-अद्भुत आसनपर बैठे मनुष्योंकी आयु जैसी है तैसी गिनते हैं ॥ १० ॥ वोह यमराज सुकृत और दुष्कृतमें कभी मोहको नहीं प्राप्त होतेहैं. जो जिसकरके सुकृत वा दुष्कृतसंचय किया है ॥११॥ वे सब वहां चित्रगुप्तकी आज्ञासे भोगतेहैं. चित्रगुप्तके स्थानसे पूर्वमें ज्वरको महान् स्थान है ॥ १२ ॥ [illegible]क्षिण दिशामें शूलको और [illegible]विस्फो[illegible]को स्थान है. पश्चिममें कालपाश, अजीर्ण

तत्सभायांचित्रगुप्तःस्वासनेपरमाद्भुते ॥ [illegible]ोग[illegible]ायुर्मानुषाणांयथान्तथं ॥ १० ॥ नमुह्यतिकथंचित्ससुकृतेदुष्कृतेपि वा ॥ यद्येनोपार्जितंकर्मशुभंवायदिवाशुभं ॥ ११ ॥ तत्सर्वंभुंजतेयत्रचित्रगुप्तस्यशासनात् ॥ चित्रगुप्तालयात्प्राच्यांज्वरस्यास्तिमहागृहम् ॥ १२ ॥ दक्षिणस्यांचशूलस्यलूताविस्फोटयोस्तथा ॥ पश्चिमेकालपाशःस्यादजीर्णस्यारुचेस्तथा ॥ १३ ॥ उदीच्यांराजरोगोऽस्तिपांडुरोगस्तथैवच ॥ ऐशान्यांतुशिरोर्तिःस्यादाग्नेय्यामस्तिमूर्च्छना ॥ १४ ॥ अतिसारोनैर्ऋतेतुवायव्यांशीतदाहकौ ॥ एवमादिभिरन्यैश्चव्याधिभिःपरिवारितः ॥ १५ ॥ लिखतेचित्रगुप्तस्तुमानुषाणांशुभाशुभं ॥ चित्रगुप्तालयादग्रेयोजनानांचविंशतिः ॥ १६ ॥ ॥ ॥ ॥ ॥

और अरुचि रहताहै ॥ १३ ॥ उत्तरमें राजरोग है, पांडुरोग है, ऐशानमें शिरपीड़ा है, अग्निकोणमें मूर्छारोगहै, ॥ १४ ॥ नैर्ऋत्यमें अतीसार है, वायव्यमें शीत और दाह रोग है ऐसे इन्होंको आदिले औरभी रोगोंसे संयुक्त है ॥ १५ ॥ ऐसे चित्रगुप्तभी मनुष्योंके शुभाशुभ लिखते हैं चित्रगुप्तके स्थानसे अगाड़ी बीश योजन ॥ १६ ॥ ॥ ॥ ॥ ॥

पुरके मध्य दिव्य धर्मराजको मंदिर है. वहां रत्नमयी दिव्य बिजली, अग्नि, सूर्य इन्होंकीसी कांतिहै ॥ १७ ॥ दोसै योजन विस्तारमें और चोड़ा है, पच्चास योजन उंचाहै ॥ १८ ॥ हजारों स्तंभोसे धारित है, वैडूर्य मणियोंसे जड़ित है, कांचनसे शोभित है, अनेक प्रकारके महल झरोखावोंसे व्याप्त है ॥ १९ ॥ शरदऋतुके मेघतुल्य सुवर्णके कलशोंसे मनोहर, चित्रविचित्र स्फटिक जातिकी मणियोंसे बंधीभ-

पुरमध्येमहादिव्यंधर्मराजस्यमंदिरं ॥ अस्तिरत्नमयंदिव्यंविद्युज्वालार्कवर्चसं ॥ १७ ॥ द्विशतंयोजनानांचविस्तारायाम तःस्फुटं ॥ पंचाशच्चप्रमाणेनयोजनानांसमुच्छ्रितं ॥ १८ ॥ धृतंस्तंभसहस्रैश्चवैडूर्यमणिमंडितं ॥ कांचनालंकृतंनानाहर्म्य प्रासादसंकुलं ॥ १९ ॥ शारदाभ्रनिभंरुक्मकलशैःसुमनोहरं ॥ चित्रस्फटिकसोपानंवज्रकुट्टिमशोभितं ॥ २० ॥ मुक्ताजा लगवाक्षंचपताकाध्वजभूषितं ॥ घंटानकनिनादाढ्यंहेमतोरणमंडितम् ॥ २१ ॥ नानाश्चर्यमयंस्वर्णकपाटशतसंकुलं ॥ ना नाद्रुमलतागुल्मैर्निष्कंटैःसुविराजितं ॥ २२ ॥ ॥ ॥ ॥ ॥

ईहैं सीढ़ीजिनकी, वज्रमणियोंसे शोभित कोठरी जिन्होंमें ॥ २० ॥ मोतियोंकी वंदनवार पताका ध्वजा इन्होंसे शोभित, अनेक घंटा और बाजेके नादसे संयुक्त, सुवर्णके तोरणसे शोभित ॥ २१ ॥ नाना आश्चर्यमयी सुवर्णके शैकड़ों केवाड़ोंसे युक्त, निष्कंटक जो नानाप्रकारके वृक्ष, लता, गुल्म इन्होंसे सुंदर शोभित ॥ २२ ॥ ॥ ॥ ॥ ॥

इन्होंको आदिले औरभी भूषणोंसे सदा भूषित, विश्वकर्माने उसको आत्मयोगप्रभावसे रचा है ॥ २३ ॥ उसमें एक दिव्य सभा है वह शौ योजन चौड़ी है, सूर्यजैसा प्रकाश है, प्रकाशमान सब जग कामरूप है ॥ २४ ॥ उसमें ज्यादा शीत नहीं है, अतिगरम नहीं है, मनको अत्यंत हर्षकारी है, उसमें शोक नहीं है, जराअवस्था नहीं है, भूख प्यास नहीं है, ॥ २५ ॥ दुःख नहीं है, जो देवतोंके और मनुष्यों-

एवमादिभिरन्यैश्चभूषणैर्भूषितंसदा ॥ आत्मयोगप्रभावैश्चनिर्मितंविश्वकर्मणा ॥ २३ ॥ तस्मिन्नस्तिसभादिव्याशतयोजनमायता ॥ अर्कप्रकाशाभ्राजिष्णुःसर्वतःकामरूपिणी ॥ २४ ॥ नातिशीतानचात्युष्णामनसोत्यंतहर्षिणी ॥ नशोकोनजरातस्यांक्षुत्पिपासेनचाप्रियं ॥ २५ ॥ सर्वेकामाःस्थितायस्यांयेदिव्यायेचमानुषाः ॥ रसवच्चप्रभूतंचभक्ष्यंभोज्यंचसर्वशः ॥ २६ ॥ रसवंतिचतोयानिशीतान्युष्णानिचैवहि ॥ पुण्याशब्दादयस्तस्यांनित्यंकामफलद्रुमाः ॥ २७ ॥ असंबाधाचसाताक्ष्यरम्याकामागमासभा ॥ दीर्घकालंतपस्तप्त्वानिर्मिताविश्वकर्मणा ॥ २८ ॥ ॥ ॥ ॥

के काम हैं, वे सब उसमें स्थित हैं, सर्व रसवाला प्रगट भक्ष्य, भोज्य है ॥ २६ ॥ रसवान सलिल और गरम जल है, उसमें पवित्र शब्दादिक हैं, नित्य इच्छामुजब फलवाले वृक्ष हैं ॥ २७ ॥ हे गरुड़! इस सभामें कोईभी बाधा नहीं ऐसी रमणीक कामपूर्वक प्राप्ति होनेवाली है. बहोतकाल तप करके, विश्वकर्मानें रची है ॥ २८ ॥ ॥ ॥ ॥ ॥ ॥

उसमें उग्र तपस्वी, सुंदर व्रतवाले, सत्यवादी, शांत, संन्यासी, सिद्ध, पवित्रकर्मवाले जाते हैं ॥ २९ ॥ वे समग्र प्रकाशमान हैं, शरीर आभूषण पहरे, सुंदर स्वच्छवस्त्र धारण करे, वहां अपने कियेभये पवित्रकर्मोंसे शोभित हुये, स्थित रहते हैं ॥ ३० ॥ उस सभामें वो भगवान धर्मराज अनुपम अपने शुभ आसनपर बैठे हैं, कैसा आसन है? दशयोजन चौड़ा, सर्वरत्नोंसे जड़ित ॥ ३१ ॥ उसपर बैठा, सत्पुरुषोंमें श्रेष्ठ, छत्रसे

तामुग्रतपसोयांतिसुव्रताःसत्यवादिनः ॥ शांताःसंन्यासिनःसिद्धाःपूताःपूतेनकर्मणा ॥ २९ ॥ सर्वेभास्वरदेहास्येऽलंकृताविरजांब राः ॥ स्वकृतैःकर्मभिःपुण्यैस्तत्रतिष्ठंतिभूषिताः ॥ ३० ॥ तस्यांसधर्मोभगवानासनेऽनुपमेशुभे ॥ दशयोजनविस्तीर्णेसर्वरत्नैःसु मंडिते ॥ ३१ ॥ उपविष्टःसतांश्रेष्ठश्छत्रशोभितमस्तकः ॥ कुंडलालंकृतःश्रीमान्महामुकुटमंडितः ॥ ३२ ॥ सर्वालंकारसंयुक्तोनी लमेघसमप्रभः ॥ बालव्यजनहस्ताभिरप्सरोभिश्चवीजितः ॥ ३३ ॥ गंधर्वाणांसमूहाश्चसंघशश्चाप्सरोगणाः ॥ गीतवादित्रनृत्या द्यैःपरितःसेवयंतितं ॥ ३४ ॥ ॥ ॥ ॥ ॥

शोभित मस्तक है, कुंडलोंसे शोभित है, श्रीमान महामुकुटसे शोभित ॥ ३२ ॥ सर्व अलंकारोंसे संयुक्त, नीलमेघोंकीसी कांतिवाले व्यजन हैं हाथमें ऐसी अप्सरोंसें पवनवान ॥ ३३ ॥ गंधर्वोंका समूह अप्सरावोंके संघ गीत वादित्र नृत्यादिकोंसे चहूंतरफ उसको सेवते हैं ॥ ३४ ॥ ॥ ॥ ॥ ॥ ॥

पाशहाथवाले मृत्युसे, बलवान् कालसे विचित्र चित्रगुप्तसे सेवित ॥ ३५ ॥ पाश और दंडके धारण करनेवाले, उग्र आज्ञावर्ती, आत्मतुल्य बलवाले योद्धावोंसे सेवित, ॥ ३६ ॥ अग्नि[illegible], [illegible], सोमपा जो उष्मपा, स्वधावंत, बर्हिषद, हे गरुड़! मूर्तिवान्, अमूर्तिवान् ॥ ३७ ॥ अर्यमाको आदि ले, पितृसमूह औरभी मूर्तिमंत ए कहेभय समग्र मुनियोंसे साथ धर्मराजकी उपासना करते हैं ॥ ३८ ॥ अत्रि, वसिष्ठ,

मृत्युनापाशहस्तेनकालेनचबलीयसा ॥ चित्रगुप्तेनचित्रेणकृतातेननिषेवितः ॥ ३५ ॥ पाशदंडधरैरुग्रैर्निदेशवशवर्तिभिः ॥ आत्म
तुल्यबलैर्नानासुभटैःपरिवारितः ॥ ३६ ॥ अग्निष्वात्ताश्चपितरःसोमपाश्चोष्मपाश्चये ॥ स्वधावंतोबर्हिषदोमूर्तामूर्ताश्चयेखग ॥३७॥
अर्यमाद्याःपितृगणामूर्तिमंतस्तथापरे ॥ सर्वेतेमुनिभिःसार्धंधर्मराजमुपासते ॥ ३८ ॥ अत्रिर्वसिष्ठःपुलहोदक्षःक्रतुरथांगिराः ॥
जामदग्न्योभृगुश्चैवपुलस्त्यागस्त्यनारदाः ॥ ३९ ॥ एतेचान्येचबहवःपितृराजसभासदः ॥ नशक्याःपरिसंख्यातुंनामभिःकर्मभिस्त
था ॥ ४० ॥ व्याख्याभिर्धर्मशास्त्राणांनिर्णेतारोयथातथं ॥ सेवंतेधर्मराजंतेशासनात्परमेष्ठिनः ॥ ४१ ॥ ॥ ॥

पुलह, दक्ष, क्रतु, अंगिरा, जामदग्न्य, भृगु, पुलस्त्य, अगस्त्य, नारद ॥ ३९ ॥ ए कहेभये औरभी बहोत पितृराजकी सभामें रहते हैं. इन्होंकी संख्या करनेको नाम और कर्मोंसे नहीं समर्थ है ॥ ४० ॥ ए व्याख्या करके, धर्मशास्त्रोंको यथार्थ निर्णय करते हैं. ब्रह्मपरमात्माकी शिक्षासे धर्मराजकी उपासना करते हैं ॥ ४१ ॥ ॥ ॥ ॥

सूर्यवंशी राजा और सोमवंशी राजा ए धर्मके ज्ञाता सभामें धर्मराजकी उपासना करते हैं ॥ ४२ ॥ मनु, दिलीप, मांधाता, सगर, भगीरथ, अंबरीष, अनरण्य, मुचकुंद, निमि, पृथु, ॥ ४३ ॥ ययाति, नहुष, पूरु, दुष्यंत, शिबि, नल, भरत, शंतनु पांडु, सहस्रार्जुन ॥४४॥ ए पवित्र राजऋषि बड़े कीर्तिमंत, बहोत श्रोता, बहोत अश्वमेधोंसे यजन करके धर्मराजके सभासद हुये हैं ॥ ४५ ॥ धर्मराजकी सभामें धर्मही वर्तता

राजानःसूर्यवंशीयाःसोमवंशास्तथापरे ॥ सभायांधर्मराजंतेधर्मज्ञाःपर्युपासते ॥ ४२ ॥ मनुर्दिलीपोमांधातासगरश्चभगीरथः ॥ अंबरीषोऽनरण्यश्चमुचुकुंदोनिमिःपृथुः ॥ ४३ ॥ ययातिर्नहुषःपूरुर्दुष्यंतश्चशिबिर्नलः ॥ भरतःशंतनुःपांडुःसहस्रार्जुनएवच ॥४४॥ एतेराजर्षयःपुण्याःकीर्तिमंतोबहुश्रुताः ॥ इष्ट्वाश्वमेधैर्बहुभिर्जाताधर्मसभासदः ॥ ४५ ॥ सभायांधर्मराजस्यधर्मएवप्रवर्तते ॥ नतत्रपक्षपातोस्तिनानृतंनचमत्सरः ॥ ४६ ॥ सभ्याःसर्वेशास्त्रविदःसर्वेधर्मपरायणाः ॥ तस्यांसभायांसततंवैवस्वतमुपासते ॥ ४७ ॥ ईदृशीसासभाताक्ष्यधर्मराज्ञोमहात्मनः ॥ नतांपश्यंतियेपापादक्षिणेनपथागताः ॥ ४८ ॥ धर्मराजपुरेगंतुंचतुर्भागाभवंतिच ॥ पापिनांगमनेपूर्वंसतुतेपरिकीर्तितः ॥ ४९ ॥ ॥ ॥ ॥

है, वहां पक्षपात नहीं है, झूठ नहीं है ॥ ४६ ॥ सब सभाके शास्त्रवेत्ता हैं, धर्मपरायण हैं, उस सभामें निरंतर वैवस्वतकी उपासना करते हैं ॥ ४७ ॥ हे गरुड़! महात्मा धर्मराजकी ऐसी सभा है. उसको दक्षिणपथसे जानेवाले पापी नहीं देखते हैं ॥ ४८ ॥ धर्मराजके पुरमें जानेको चार मार्ग हैं तिन्होंमें पापियोंके जानेका जो दक्षिणमार्ग है वो तुमको पूर्व कहा है ॥ ४९ ॥ ॥ ॥

पूर्वदिशाको आदि ले, तीन मार्गोंकरके, जो धर्मराजके पुरमें जाते हैं वही सुकृति पुण्यप्रभावसे उस सभामें जाते हैं. उन्होंको सुनो ॥५०॥ तहां एक पूर्वमार्ग है उसमें सर्व भोग हैं. कल्पवृक्षकी छायासे आच्छादित और रत्नोंसे मंडित है ॥ ५१ ॥ विमानोंके समूहसे व्याप्त हैं, हंसोंकी पंक्तियोंसे शोभित है, विद्रुमजातिके वृक्षोंसे युक्त ऐसे बगीचासे संयुक्त है, अमृतद्रव संयुक्त है, ॥ ५२ ॥ उस पूर्वमार्गसे ब्रह्मऋषि जाते

पूर्वादिभिस्त्रिभिर्मार्गैर्येगताधर्ममंदिरे ॥ तेहिसुकृतिनःपुण्यैस्तस्यांगच्छंतितान्शृणु ॥ ५० ॥ पूर्वमार्गस्तुतत्रैकःसर्वभोगसमन्वितः ॥ पारिजाततरुच्छायाच्छादितोरत्नमंडितः ॥ ५१ ॥ विमानगणसंकीर्णोहंसावलिविराजितः ॥ विद्रुमारामसंकीर्णपीयूषद्रवसंयुतः ॥ ५२ ॥ तेनब्रह्मर्षयोयांतिपुण्याराजर्षयोऽमलाः ॥ अप्सरोगणगंधर्वविद्याधरमहोरगाः ॥ ५३ ॥ देवताराधकाश्चान्येशिवभक्तिपरायणाः ॥ ग्रीष्मेप्रपादानरतामाघेकाष्ठप्रदायिनः ॥ ५४ ॥ विश्रामयंतिवर्षासुविरक्तान्दानमानतः ॥ दुःखितस्यामृतंब्रूतेददतेह्याश्रमंतुये ॥ ५५ ॥ ॥ ॥ ॥

हैं और पवित्र राजर्षि निर्मल स्वरूपवाले जाते हैं, अप्सरावोंके समूह, गंधर्व, विद्याधर, उरग ॥ ५३ ॥ और देवतोंका आराधन करनेवाले, शिवकी भक्तिमें परायण, ग्रीष्मऋतुमें प्रपादन देनेवाले, माघमें काष्ठदान करनेवाले ॥ ५४ ॥ और जो वर्षाऋतुमें विरक्तोंको दान और मानसे विश्राम देनेवाले और जो दुःखियोंको अमृतजैसा बोलते हैं और जो आश्रम देते हैं ॥ ५५ ॥ ॥ ॥

जो सत्यधर्ममें आसक्त हैं, क्रोधलोभसे रहित हैं, पितृ माताके जे भक्त हैं, गुरुकी शुश्रूषा करतेहैं, ॥ ५६ ॥ भूमिदान करनेवाले, गौदान देनेवाले, घरका दान देनेवाले, विद्यादानके देनेवाले, पुराणके वक्ता और श्रोता और वेदपुराणका पारायण करनेवाले वा सुननेवाले ॥ ५७ ॥ ए कहेभये और औरभी सुकृती पूर्वद्वारमें प्रवेश करते हैं. वे सुशील शुद्धबुद्धि धर्मसभामें जाते हैं ॥ ५८ ॥ दूसरा उत्तरमार्ग है, शैकड़ों महारथोंसे संयुक्त है, पालकियोंसे संयुक्त, मलयागिरि चंदनसे सुगंधित, ॥ ५९ ॥ हंस सारसोंसे संयुक्त, चक्रवाकोंसे शोभित, अमृतश्रावसें

सत्यधर्मतरायेचक्रोधलोभविवर्जिताः ॥ पितृमातृषुयेभक्तागुरुशुश्रूषणेरताः ॥ ५६ ॥ भूमिदागृहदागोदाविद्यादानप्रदायकाः ॥
पुराणवक्तृश्रोतारःपारायणपरायणाः ॥ ५७ ॥ एतेसुकृतिनश्चान्येपूर्वद्वारेविशंतिच ॥ यांतिधर्मसभायांतेसुशीलाःशुद्धबुद्धयः ॥५८॥
द्वितीयस्तूत्तरोमार्गोमहारथशतैर्वृतः ॥ नरयानसमायुक्तोहरिचंदनमंडितः ॥ ५९ ॥ हंससारससंकीर्णश्चक्रवाकोपशोभितः ॥ अ
मृतद्रवसंपूर्णस्तत्रभातिसरोवरः ॥ ६० ॥ अनेनवैदिकायांतितथाभ्यागतपूजकाः ॥ दुर्गाभान्वोश्चयेभक्तास्तीर्थस्नाताश्चपर्वसु
॥ ६१ ॥ येमृताधर्मसंग्रामेऽनशनेनमृताश्चये ॥ वाराणस्यांगोग्रहेचतीर्थतोयेमृताविधेः ॥ ६२ ॥ ॥ ॥

संयुक्त है, तहां सरोवर शोभायमान है ॥ ६० ॥ इस मार्गसे वैदिक जातेहैं. तैसे अभ्यागत पूजन करनेवाले, गरीबोंको देनेवाले, दुर्गा और सूर्यके जो भक्त हैं, पर्वमें तीर्थोंपर स्नान करनेवाले, ॥ ६१ ॥ जो धर्मसंग्राममें मरते हैं, जे अनशन करके, मरते हैं, काशीमें गौवोंके पकड़नेमें, तीर्थजलमें, इन्होंमें जो मरते हैं ॥ ६२ ॥ ॥ ॥ ॥ ॥

ब्राह्मणके वास्ते, स्वामिकार्यमें, तीर्थक्षेत्रमें जो मरते हैं, जो देवतोंके विध्वंसमें मरते हैं, जो योगाभ्याससे मरते हैं, ॥ ६३ ॥ जो नित्य सत्पात्रकी पूजा करते हैं, जो महादानमें आसक्त हैं वे उत्तर दरवाजासे प्रवेश करते हैं. और धर्मसभामें जाते हैं ॥ ६४ ॥ तीसरा पश्चिम मार्ग है, रत्नोंके मंदिरोंसें शोभित है, अमृतरससें सदा पूर्ण रहै ऐसी बावड़ीसे शोभायमान ॥६५॥ ऐरावतके कुलमें भये मतवाले हाथियोंसें व्याप्त, उच्चैःश्रवासे

ब्राह्मणार्थेस्वामिकार्येतीर्थक्षेत्रेषुयेमृताः ॥ येमृतादेवविध्वंसेयोगाभ्यासेनयेमृताः ॥ ६३ ॥ सत्पात्रपूजकानित्यंमहादानरताश्चये ॥ प्रविशंत्यु त्तरेद्वारेयांतिधर्मसभांचते ॥ ६४ ॥ तृतीयःपश्चिमोमार्गोरत्नमंदिरमंडितः ॥ सुधारससदापूर्णदीर्घिकाभिर्विराजितः ॥ ६५ ॥ ऐरावतकुलोद्भूतमत्तमातंगसंकुलः ॥ उच्चैःश्रवःसमुत्पन्नहयरत्नसमन्वितः ॥ ६६ ॥ एतेनात्मपरायांतिसच्छास्त्रपरिचिंतकाः ॥ अनन्यविष्णुभक्ताश्चगायत्रीमंत्रजापकाः ॥ ६७ ॥ परहिंसापरद्रव्यपरवादपराङ्मुखाः ॥ स्वदारनिरताःसंतःसाग्निकावेदपाठकाः ॥ ६८ ॥ ब्रह्मचर्यव्रतधरावानप्रस्थास्तपस्विनः ॥ श्रीपादसंन्यासपराःसमलोष्टाश्मकांचनाः ॥ ६९ ॥ ॥

हुये हयरत्नोंसे संयुक्त ॥ ६६ ॥ इसमार्गसे जो आत्मामें परायण हैं, सच्छास्त्रोंका चिंतवन करनेवाले, अनन्य विष्णुभक्त, गायत्रीमंत्रके जापक ए जाते हैं ॥ ६७ ॥ परहिंसा, परद्रव्य, परवाद, इन्होंको कभी नहीं करते हैं, स्वस्त्रीसे भोग करनेवाले, महात्मा, साग्निक, वेदपाठी, ॥ ६८ ॥ ब्रह्मचर्यव्रतधारी और वानप्रस्थ, तपस्वी, श्रीपाद, संन्यासमें परायण, जिन्होंके लोष्ट, पत्थर, सुवर्ण ए तुल्य हैं ॥ ६९ ॥ ॥

जो ज्ञानवैराग्यसे संयुक्त हैं, सर्वभूतोंको उपकार करनेवाले, शिवविष्णुके व्रत करनेवाले, कर्मोंको ब्रह्मके अर्पण करनेवाले ॥ ७० ॥ तीनों ऋणोंसे छूटे, सदा पंचयज्ञोंमें आसक्त, पितृश्वरोंके श्राद्धदाता, त्रिकाल संध्योपासन करनेवाले, ॥ ७१ ॥ नीचसंगसे रहित, सत्संगतिमें परायण ए कहेभये अप्सरोंके समूहोंसे संयुक्त, श्रेष्ठ विमानोंपर स्थित हुये, ॥ ७२ ॥ अमृत पान करते धर्मराजके मंदिरमें जाते हैं. पश्चिमद्वारसे प्र-

ज्ञानवैराग्यसंपन्नाःसर्वभूतहितेरताः ॥ शिवविष्णुव्रतकराःकर्मब्रह्मसमर्पकाः ॥ ७० ॥ ऋणैस्त्रिभिर्विनिर्मुक्ताःपंचयज्ञर
ताःसदा ॥ पितॄणांश्राद्धदातारःकालेसांध्यमुपासकाः ॥ ७१ ॥ नीचसंगविनिर्मुक्ताःसत्संगतिपरायणाः ॥ एतेप्सरो
गणैर्युक्ताविमानवरसंस्थिताः ॥ ७२ ॥ सुधापानंप्रकुर्वंतोयांतितेधर्ममंदिरं ॥ विशंतिपश्चिमद्वारेयांतिधर्मसभांतरे
॥ ७३ ॥ यमस्तानागतान्दृष्ट्वास्वागतंवदतेमुहुः ॥ समुत्थानंचकुरुतेतेषांगच्छतिसंमुखं ॥ ७४ ॥ तदाचतुर्भुजोभूत्वा
शंखचक्रगदासिभृत् ॥ पुण्यकर्मरतानांचस्नेहान्मित्रवदाचरेत् ॥ ७५ ॥ सिंहासनंचददतेनमस्कारंकरोतिच ॥ पदार्घं
कुरुतेपश्चात्पूजतेचंदनादिभिः ॥ ७६ ॥ ॥ ॥ ॥ ॥

वेश होय, धर्मराजकी सभामें जाते हैं ॥ ७३ ॥ यमराज उन आयेभयोंको देख, 'स्वागतं' ऐसे वारंवार कहते हैं. उठकर, उन्होंके सन्मुख जाते हैं ॥ ७४ ॥ तब चतुर्भुज होकर, शंख, चक्र, गदा, खड्गको धारणकर, पुण्यकर्म करनेवालेसे मित्रका जैसे स्नेह करते हैं ॥ ७५ ॥ उनको सिंहासन देते हैं, नमस्कार करते हैं, फेर पाद्य, अर्घ्यकरके चंदनादिकोंसे पूजते हैं ॥ ७६ ॥ ॥ ॥

वहां कल्पपर्यंत वास कर देवतोंके भोग भोगकर, पुण्यशेषसे पुण्यसें प्राप्त होनेमें आवै. ऐसा मनुष्यजन्म प्राप्त होता है ॥ ८४ ॥ उस मनुष्यजन्ममें महाधनी, सर्वज्ञाता, सर्वशास्त्रमें निपुण ऐसा होता है. फेर आत्मविचारकरके, परमगतिको प्राप्त होता है ॥ ८५ ॥ हे गरुड ! ए तुमको पूंछाहुवा सर्व यमका स्थान वर्णन किया है इसको भक्तिसे सुनताहुवा पुरुष धर्मराजकी सभामें जाता है ॥ ८६ ॥ इति श्रीगरुडपुराणे सारोद्धारे ज्ञानबोधिनीभाषाटीकायां धर्मराजनगरनिरूपणोनाम चतुर्दशोऽध्यायः ॥ १४ ॥ अब गरुड़जी कहते हैं— धर्मात्मा स्वर्ग भोग-

उषित्वातत्रकल्पांतंभुक्त्वाभोगानमानुषान् ॥ प्राप्नोतिपुण्यशेषेणमानुष्यंपुण्यदर्शनम् ॥ ८४ ॥ महाधनीचसर्वज्ञःसर्वशास्त्रविशारदः ॥ पुनःस्वात्मविचारेणततोयातिपरांगतिम् ॥८५॥ एतत्तेकथितंसर्वंत्वयापृष्टंयमालयम् ॥ इदंशृण्वन्नरोभक्त्याधर्मराजसभांव्रजेत् ॥ ८६ ॥ इतिश्रीगरुडपुराणेसारोद्धारेधर्मराजनिरूपणोनामचतुर्दशोऽध्यायः॥१४॥ ॥गरुडउवाच॥ ॥धर्मात्मास्वर्गतिंभुक्त्वाजायतेविमलेकुले ॥ अतस्तस्यसमुत्पत्तिंजननीजठरेवद ॥ १ ॥ यथाविचारंकुरुतेदेहेऽस्मिन्सुकृतीजनः ॥ तथाहंश्रोतुमिच्छामिवदमेकरुणानिधे॥२॥ ॥श्रीभगवानुवाच॥ ॥साधुपृष्टंत्वयाताक्ष्र्यपरंगोप्यंवदामिते॥यस्यविज्ञानमात्रेणसर्वज्ञत्वंप्रजायते ॥३॥

कर, निर्मल कुलमें जन्मता है. इससे उनकी उत्पत्ती माताके पेटमें कैसे होती है, सो कहो ॥ १ ॥ जैसे सुकृती पुरुष इस मनुष्यशरीरमें विचार करता है तैसे हम सुननेकी इच्छा करते हैं. हे करुणानिधे! हमारेको कहो ॥ २ ॥ अब भगवान कहते हैं— हे गरुड़ ! तुमने श्रेष्ठ बात पूंछी है. परमगुप्त तुमको, कहता हूं जिसके अनुभवज्ञानमात्रसे सर्वज्ञत्वपना प्रगट होता है ॥ ३ ॥ ॥ ॥

ऐसे कहते हैं कि– हे सभासदो! इस ज्ञानीको परमआदरसे नमस्कार करो. यह हमारा मंडल भेदन कर, ब्रह्मलोकमें जायगा ॥ ७७ ॥ अब आयेभये पुण्यवानोंको कहता है–हे बुद्धिमानोंमें श्रेष्ठ! तुम नरकके क्लेशसे डरके, पुण्यवान तुमने सुख देनेवाले देवत्वपना सिद्ध किया है ॥७८॥ जो दुर्लभ ए मनुष्यशरीर प्राप्त होकर, नित्य जो साधना नहीं करता है वो घोर नरकमें जाता है. उससे जड़ और कौन है ॥७९॥ अस्थिर शरीरसे, अस्थिर धनादिकोंसे, स्थिर धर्मको जो संचय करता है वो एक बुद्धिवान् पुरुष है ॥ ८० ॥ तिसीसे सर्वयत्नसे धनसंचय करना.

नमस्कुर्वंतिभोःसभ्याज्ञानिनंपरमादरात् ॥ एषमेमंडलंभित्त्वाब्रह्मलोकंप्रयास्यति ॥ ७७ ॥ भोभोबुद्धिमतांश्रेष्ठानरकक्लेशभीरवः ॥
भवद्भिःसाधितंपुण्यैर्देवत्वंसुखदायकम् ॥ ७८ ॥ मानुष्यंदुर्लभंप्राप्यनित्यंयस्तुनसाधयेत् ॥ सयातिनरकंघोरंकोऽन्यस्तस्मादचेतनः
॥ ७९ ॥ अस्थिरेणशरीरेणयोऽस्थिरैश्चधनादिभिः ॥ संचिनोतिस्थिरंधर्मंसएकोबुद्धिमान्नरः ॥ ८० ॥ तस्मात्सर्वप्रयत्नेनकर्तव्यो
धर्मसंचयः ॥ गच्छध्वंपुण्यवत्स्थानंसर्वभोगसमन्वितम् ॥ ८१ ॥ इतिधर्मवचःश्रुत्वातंप्रणम्यसभांचताम् ॥ अमरैःपूज्यमानास्ते
स्तूयमानामुनीश्वरैः ॥ ८२ ॥ विमानगणसंकीर्णाःप्रयांतिपरमंपदम् ॥ केचिद्धर्मसभायांहितिष्ठंतिपरमादरात् ॥ ८३ ॥ ॥

उससे सर्वभोगसंयुक्त पुण्यवान स्थानमें जाना ॥ ८१ ॥ ऐसे धर्मराजका धार्मिक वचन सुनकर, उस धर्मराजको वा सभाको नमस्कार करके, देवतोंसे पूजाहुए, मुनीश्वरोंसे स्तुतिको प्राप्त भये ॥ ८२ ॥ विमानोंके समूहसे युक्त परमपदको जाते हैं. कितनेक धर्मसभामें परम आदरसे स्थित रहते हैं ॥ ८३ ॥ ॥ ॥ ॥ ॥ ॥

अब शरीरका पारमार्थिक स्वरूप कहता हूं कैसा स्वरूप है ब्रह्मांड॰ गुणोंसे संयुक्त योगिराजोंके धारणाका स्थान ॥ ४ ॥ जिस परमार्थिक स्वरूपमें जैसे योगिराज षट्चक्र चित... ...ते हैं. और ब्रह्मरंध्रमें चिदानंद रूपको ध्यान जैसे करते हैं सो सुनो ॥ ५ ॥ प... श्रीमंतोंके घरमें जसे सुकृती जन्मता है तैसे विधि और नियम उनके माता पिताके तुमको कहता हूं ॥ ६ ॥ स्त्रियोंके ऋतुकालमें चार दिन त्यागने

वक्ष्यामिचशरीरस्यस्वरूपंपारमार्थिकं ॥ ब्रह्मांडगुणसंपन्नंयोगिनांधारणास्पदम् ॥ ४ ॥ षट्चक्रचिंतनंयस्मिन्यथाकुर्वंतियोगिनः ॥ ब्रह्मरंध्रेचिदानंदरूपध्यानंतथाश्रृणु ॥ ५ ॥ शुचीनांश्रीमतांगेहेजायतेसुकृतीयथा ॥ तथाविधानंनियमंतत्पित्रोः कथयामिते ॥ ६ ॥ ऋतुकालेतुनारीणांत्यजेद्दिनचतुष्टयम् ॥ तावन्नालोकयेद्वक्त्रंपापंवपुषिसंभवेत् ॥ ७ ॥ स्नात्वासचैलं सानारीचतुर्थेऽहनिशुध्यति ॥ सप्ताहात्पितृदेवानांभवेद्योग्याव्रतार्चने ॥ ८ ॥ सप्ताहमध्येयोगर्भःसभवेन्मलिनाशयः ॥ प्रायशःसंभवंत्यत्रपुत्रास्त्वष्टाहमध्यतः ॥ ९ ॥ ॥ ॥ ॥ ॥

वो चार दिनतक मुख नहीं देखना. कारण शरीरमें पाप रहता है ॥ ७ ॥ वह स्त्री वस्त्रोंसहित स्नान करके चौथे दिन शुद्ध होती है और पितर देवतोंके व्रत करनेमें पूजा करनेमें योग्य सात दिनसे होती है ॥ ८ ॥ सातदिवसके मध्य ज़ो गर्भ होता है वोह मलिनाशय होता है और आठ दिवसके अंदरही अवश्य पुत्रादिक होते हैं तथापि सुकृती आठदिनके अंदर नहीं होता है ॥ ९ ॥ ॥ ॥

कारण सातदिवसके अंदर जो गर्भ होता है वो मलिनाशय होता है. इसीसे युग्मतिथियोंमें पुत्र जन्मते हैं. और विषम तिथियोंमें कन्या होती है. तिसीसे प्रथमके सात दिवस त्यागकर, पीछे युग्मतिथियोंमें स्त्रीसंग करना ॥ १० ॥ स्त्रियोंके सोला रात्री सामान्यतासे ऋतुकी कही हैं. जो चौदहवीं रात्रि है तहां गर्भ रहता है वो गुणभाग्यको निधि धर्मात्मा पुत्र जन्मता है ॥ ११ ॥ वोह चौदहीं रात्रि प्राकृत जीवोंको कभी नहीं प्राप्त होती है उसमें दैवी जन्मता है ॥ १२ ॥ पांचवें दिन स्त्रियोंको मधुर भोजन करना, कटु, क्षार, तीक्ष्ण और गरम

युग्मासुपुत्राजायंतेस्त्रियोऽयुग्मासुरात्रिषु ॥ पूर्वसप्तकमुत्सृज्यतस्माद्युग्मासुसंविशेत् ॥ १० ॥ षोडशर्तुनिशाःस्त्रीणांसामान्याः समुदाहृताः ॥ यावैचतुर्दशीरात्रिर्गर्भस्तिष्ठतितत्रवै ॥ ११ ॥ गुणभाग्यनिधिःपुत्रस्तदाजायेतधार्मिकः ॥ सानिशाप्राकृतैर्जीवैर्न लभ्येतकदाचन ॥ १२ ॥ पंचमेहनिनारीणांकार्यंमधुरभोजनम् ॥ कटुक्षारंचतीक्ष्णंचत्याज्यमुष्णंचदूरतः ॥ १३ ॥ तत्क्षेत्रमोषधी पात्रंबीजंचाप्यमृतायितम् ॥ तस्मिन्नुप्त्वानरःस्वामीसम्यक्फलमवाप्नुयात् ॥ १४ ॥ ॥ ॥ ॥

ए दूरसे त्यागने ॥ १३ ॥ वोह क्षेत्र तौ औषधको पात्र है. बीजभी अमृततुल्य है. जैसे खेतयवादि अन्नको उत्पन्न करता उसमें कांटा, गुल्म, वगैरै होंय उनको दूर करनेसे, जल सिंचनेसे श्रेष्ठ; अन्न होता है तैसे पुत्रोत्पत्तिको स्थान स्त्रियोंको गर्भरूप क्षेत्र उसमें कांटा गुल्मरूपी, कटुआदि भोजन त्यागकर, वीर्यसेचनकर, उसमें बोनेसे पिता श्रेष्ठ धर्मात्मा पुत्रको प्राप्त होता है ॥ १४ ॥ ॥ ॥

तांबूल, पुष्प, चंदन इनोंसे संयुक्त पुष्प श्रेष्ठवस्त्रको धारणकर, मनमें धर्मग्रहण कर, सुंदर शय्यापर प्राप्त होवै ॥ १५ ॥ संभोगसमयमेंजैसी मनुष्यकी चित्तकी विकल्पना हो वैसा स्वभावका प्रगटनेवाला जीव कुक्षिमें प्राप्त होताहै ॥ १६ ॥ बीजरूप चैतन्यता नित्य कुक्षिवीर्यमें रहतीहै जब काम चित्त वीर्य एकत्र हो ॥ १७ ॥ तब मनुष्य स्त्रीके गर्भाशयमें द्राव अर्थात् वीर्य सींचताहै उस वख्त शुक्र और रुधिरके

तांबूलपुष्पश्रीखंडैःसंयुक्तःशुचिवस्त्रभृत् ॥ धर्ममादायमनसिसुतल्पंसंविशेत्पुमान् ॥ १५ ॥ निषेकसमयेयादृङ्नरचित्तविकल्पना ॥ तादृक्स्वभावसंभूतिर्जंतुर्विशतिकुक्षिगः ॥ १६ ॥ चैतन्यंबीजभूतंहिनित्यंशुक्रेप्यवस्थितम् ॥ कामश्चित्तंचशुक्रंचयदाह्येकत्वमाप्नुयात् ॥ १७ ॥ तदाद्रावमवाप्नोतियोषिद्गर्भाशयेनरः ॥ शुक्रशोणितसंयोगात्पिंडोत्पत्तिःप्रजायते ॥ १८ ॥ परमानंददःपुत्रोभवेद्गर्भगतःकृती ॥ भवंतितस्यनिखिलाःक्रियाःपुंसवनादिकाः ॥ १९ ॥ जन्मप्राप्नोतिपुण्यात्माग्रहेषूच्चगतेषुच ॥ तज्जन्मसमयेविप्राःप्राप्नुवंतिधनंबहु ॥ २० ॥ विद्याविनयसंपन्नोवर्धतेपितृवेश्मनि ॥ सतांसंगेनसभवेत्सर्वागमविशारदः ॥ २१ ॥ ॥ ॥ ॥ ॥

संयोगसे पिंडोत्पत्ति होतीहै ॥ १८ ॥ सुकृती गर्भमें प्राप्त हुवा परम आनंदका देनेवाला होताहै. उसकी समग्र पुंसवनादिक क्रिया होतीहैं ॥ १९ ॥ पुण्यात्मा पुरुष उच्च राशिपर ग्रह हों तब जन्मताहै उस सुकृतीके जन्मनेके बखत ब्राह्मणोंको बहोत धन मिलताहै ॥ २० ॥ वोह विद्या नम्रतासे संयुक्त हुवा पिताके घरमें वृद्धिको प्राप्त होताहै. सत्पुरुषोंके संगसे सर्व वेदोंमें निपुण होताहै ॥ २१ ॥ ॥

तरुण अवस्थामें दिव्य स्त्रीआदि भोगोंको भोक्ता हो दानी और धनी हो, पूर्व कहाहुवा तप तीर्थ महापुण्य इन्होंके उदयसे ॥ २२ ॥
पीछे वृद्धा अवस्थामें नित्य आत्मा और अनात्माके विचारमें मनसे यत्न करताहै. अध्यारोप अर्थात् नहीं सर्पऐसी जेवड़ीमें सर्पको मानके
भ्रम करना वस्तुमें अवस्तुका आरोपण ए अध्यारोप अपवादजैसे अवस्तुमें वस्तुका भ्रम यथा असत्य नाशवान संसारको सत्य समझना ए
अध्यारोप और अपवादसे पदार्थको जानकर "सर्वं खल्विदं ब्रह्म" "नेह नानास्ति किंचन" इत्यादि श्रुतियोंमें कहे विचारसे ब्रह्मचिंतन

दिव्यांगनादिभोक्तास्यात्तारुण्येदानवान्धनी ॥ पूर्वंकृततपस्तीर्थमहापुण्यफलोदयात् ॥ २२ ॥ ततश्चयततेनित्यमात्मानात्मवि
चारणे ॥ अध्यारोपापवादाभ्यांकुरुतेब्रह्मचिंतनम् ॥ २३ ॥ अस्यासंगावबोधायब्रह्मणोन्वयकारिणः ॥ क्षित्याद्यनात्मवर्गस्यगुणांस्ते
कथयाम्यहम् ॥ २४ ॥ क्षितिर्वारिहविर्भोक्तावायुराकाशएवच ॥ स्थूलभूताइमेप्रोक्ताःपिंडोऽयंपांचभौतिकः ॥ २५ ॥ त्वगस्थि
नाड्योरोमाणिमांसंचैवखगेश्वर ॥ एतेपंचगुणाभूमेर्मयातेपरिकीर्तिताः ॥ २६ ॥ ॥ ॥ ॥

करे ॥ २३ ॥ आत्मानामसे ईश्वर अनात्मानामसे देहआदि पदार्थ तहां अनात्मा पृथ्वीआदिमें ब्रह्मका अन्वय है और पीछे सबसे जुदा है
ऐसा आत्मारूप, ब्रह्मके ज्ञानके वास्ते पृथ्वीआदि अनात्म पदार्थोंका गुण मैं तुमको कहताहूं ॥ २४ ॥ अब अनात्म अर्थात् देहादिकका
विचार कहतेहैं. पृथ्वी, जल, तेज, वायु, आकाश ए पंच महाभूत हैं. इन पंचभूतोंसे उत्पन्न हुवा शरीर है ॥ २५ ॥ हे गरुड़! त्वचा, हाड़,
नसैं, रोम, मांस ए पांच पृथ्वीके गुण मैंने तुमको कहे ॥ २६ ॥ ॥ ॥ ॥ ॥

गं० ॥८

लाला, मूत्र, वीर्य, मज्जा पंचम रक्त ए पांच जलके गुण कहे. अब तेजकेभी सुनो ॥ २७ ॥ क्षुधा, प्यास, आलस्य, नींद, कांति हे गरुड़ ! ए पांच गुण तेजके सब जगह योगिराजोंने कहेहैं ॥ २८ ॥ अंगोंका संकोचन १, भ[illegible]ा २, लंघन ३, अंगोंका पसारना ४, चेष्टा करनी ५ ए पांच वायुके गुण कहेहैं ॥ २९ ॥ शब्द सुनना, चिंता, शून्यता, मोह, चित्तमें संदेह ए पांच आकाशके गुण हैं. सो यत्नसे जानने ॥ ३० ॥ मन, बुद्धि, अहंकार, चित्त इन चारों संबंधी शुभाशुभ पूर्वकर्मोंकी वासनायुक्त अंतःकरण कहाहै ॥ ३१ ॥ श्रोत्र, त्वचा, नेत्र, जिव्हा, नाशिका ए पंच ज्ञानइंद्रियां हैं. वाणी, हाथ, पैर, गुदा, लिंग ए पांच कर्मइंद्रियां हैं ॥ ३२ ॥ दिशा, वायु, सूर्य, प्रचेता, अश्विनीकुमार, अग्नि, इंद्र, उपेंद्र, मित्रावरुण दक्ष ए ज्ञान और कर्म इंद्रियोंके देवता कहेहैं ॥ ३३ ॥

लालामूत्रंतथाशुक्रंमज्जारक्तंचपंचमम् ॥ अपांपंचगुणाःप्रोक्तास्तेजसोऽपिनिशामय ॥ २७ ॥ क्षुधातृषातथालस्यंनिद्राकांतिस्तथैवच ॥ तेजःपंचगुणंतार्क्ष्यप्रोक्तंसर्वत्रयोगिभिः ॥ २८ ॥ आकुंचनंधावनंचलंघनंचप्रसारणं ॥ चेष्टितंचेतिपंचैवगुणा वायोःप्रकीर्तिताः ॥ २९ ॥ घोषश्चिंताचशून्यत्वंमोहश्चिंताचसंशयः ॥ आकाशस्यगुणाःपंचज्ञातव्यास्तेप्रयत्नतः ॥ ३० ॥ मनोबुद्धिरहंकारश्चित्तंचेतिचतुष्टयम् ॥ अंतःकरणमुद्दिष्टंपूर्वकर्माधिवासितम् ॥ ३१ ॥ श्रोत्रंत्वक्चक्षुषीजिह्वाघ्राणंज्ञानेंद्रियाणिच ॥ वाक्पाणिपादपायूपस्थानिकर्मेंद्रियाणिच ॥ ३२ ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ॥ ज्ञानकर्मेंद्रियाणांचदेवताःपरिकीर्तिताः ॥ ३३ ॥

इडा, पिंगला, सुषुम्णा, गांधारी, गजजिव्हा, पूषा, यशस्विनी ॥ ३४ ॥ अलंबुषा, कुहू, शंखिनी ए शरीरमें स्थित मुख्य दश नाड़ियांहैं ॥ ३५ ॥ प्राण, अपान, समान, उदान, व्यान, नाग, कूर्म, कृकल, देवदत्त, धनंजय ए दश शरीरमें प्राण हैं ॥ ३६ ॥ हृदयमें प्राण रहता है, गुदामें अपान रहताहै, नाभिमें समान रहताहै, उदान कंठमें रहताहै, व्यान सर्वशरीरमें रहताहै ॥ ३७ ॥ डकारमें नागनाम प्राण कह्या है, नेत्र

इडाचपिंगलाचैवसुषुम्णाख्यातृतीयका ॥ गांधारीगजजिह्वाचपूषाचैवयशस्विनी ॥ ३४ ॥ अलंबुषाकुहूश्चापिशंखिनीदशमीतथा ॥ पिंडमध्यस्थिताह्येताःप्रधानादशनाडिकाः ॥ ३५ ॥ प्राणोऽपानःसमानाख्यउदानोव्यानएवच ॥ नागःकूर्मश्चकृकलोदेवदत्तोधनंजयः ॥ ३६ ॥ हृदिप्राणोगुदेऽपानःसमानोनाभिमंडले॥उदानःकंठदेशेस्याद्व्यानःसर्वशरीरगः ॥ ३७ ॥ उद्गारेनागआख्यातःकूर्मउन्मीलनेस्मृतः ॥ कृकलःक्षुत्करोज्ञेयोदेवदत्तोविजृंभणे ॥ ३८ ॥ नजहातिमृतंवापिसर्वव्यापिधनंजयः ॥ कवलैर्भुक्तमन्नंहिपुष्टिदंसर्वदेहिनां ॥ ३९ ॥ नयतेव्यानकोवायुःसारांशंसर्वनाडिषु ॥ आहारोभुक्तमात्रोहिवायुनाक्रियतेद्विधा ॥ ४० ॥ ॥ ॥ ॥ ॥

उघड़नेमें कूर्म प्राण कहा है, क्षुधाकरनेमें कृकल प्राण कहा है, जंभाईमें देवदत्त नाम प्राण कहा है, ॥ ३८ ॥ सर्व शरीरव्यापी धनंजय मरेहुयेकोभी नहीं त्यागैहै वोह ग्रासोंसें खायाहुवा अन्न सर्वशरीरको पुष्टिदेताहै ॥ ३९ ॥ व्यान नाम वायु सर्वनाड़ियोंमें अन्नके सारांशको लेजाताहै, खायेहुये आहारके वायुसे दो प्रकार किये जातेहैं ॥ ४० ॥ ॥ ॥ ॥ ॥

साढ़ेतीन करोड़ व्यावहारिक शरीरके रोवां हैं, सात लाख केश हैं. नख बीश कहे हैं ॥ ४७ ॥ बत्तीस दांत कहे हैं. हे गरुड़ ! ए सामान्य-तासे कहा है और हजार पल मांस कहा है सौपल लोही कहा है ॥ ४८ ॥ दश पल मेदा कही है, सत्तर पल त्वचा कही है, बारह पल मज्जा कही है, तीन पल महारक्त कहा है, ॥ ४९ ॥ दो कुड़व शुक्र कहा है एक कुड़व रक्त कहा है. तीनसौ साठ शरीरमें अस्थि कहे हैं

तिस्रःकोट्योऽर्धकोटीचरोमाणिव्यावहारिके ॥ सप्तलक्षाणिकेशाःस्युर्नखाःप्रोक्तास्तुविंशतिः ॥४७॥ द्वात्रिंशद्दशनाःप्रोक्ताः सामान्याद्विनतासुत ॥ मांसंपलसहस्रंतुरक्तंपलशतंस्मृतम् ॥ ४८ ॥ पलानिदशमेदस्तुत्वक्पलानिचसप्ततिः ॥ पलद्वादश कंमज्जामहार[illegible]लत्रयम् ॥ ४९ ॥ शुक्रंद्विकुडवंज्ञेयंकुडवंशोणितंस्मृतम् ॥ षष्ठ्युत्तरंचत्रिशतमस्थ्नांदेहेप्रकीर्तितम् ॥५०॥ [illegible]ःस्थूलाश्चसूक्ष्माश्चकोटिशःपरिकीर्तिताः ॥ पित्तंपलानिपंचाशत्तदर्धंश्लेष्मणस्तथा ॥ ५१ ॥ सततंजायमानंतुविण्मूत्रंचाप्रमाणतः ॥ एतद्गुणसमायुक्तंशरीरंव्यावहारिकं ॥ ५२ ॥ भुवनानिचसर्वाणिपर्वतद्वीपसागराः ॥ आदित्याद्याग्रहाः संतिशरीरेपारमार्थिके ॥ ५३ ॥ ॥ ॥ ॥ ॥

॥ ५० ॥ स्थूल और सूक्ष्म ऐसी कोटिप्रमाण नाड़ी कही हैं. पचाश पल पित्त है. और पच्चीश पल कफ है ॥ ५१ ॥ रात दिवस होनेवा-ला मल मूत्र अप्रामाणिक है. इन कहेभये गुणोंसहित व्यावहारिक शरीर है ॥५२॥ दूसरे पारमार्थिक शरीरमें चौदा भुवन, पर्वत, द्वीप, समुद्र, सूर्यादि ग्रह ए परमार्थिक शरीरमें हैं ॥ ५३ ॥ ॥ ॥ ॥ ॥

